# Devanāgari Typesetting for the Bhagavad Gita

June 24, 2023

# Contents

Dhyāna Ślokas . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ii

1 Arjuna Viṣāda Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 1

2 Sāṅkhya Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 5

3 Karma Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 10

4 Jñāna Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 13

5 Karma-Sannyāsa Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . 16

6 Ātma-Saṃyama Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . 19

7 Jñāna-Vijñāna Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 23

8 Akṣara-Parabrahma Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . 26

9 Rājavidyā-Rājaguhya Yoga . . . . . . . . . . . . . . . . . . . . . . . . . 28

10 Vibhūti Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 31

11 Viśvarūpa Sandarśana Yoga . . . . . . . . . . . . . . . . . . . . . . . . 34

12 Bhakti Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 38

13 Kṣetrakṣetrajñavibhāga Yoga . . . . . . . . . . . . . . . . . . . . . . . 40

14 Guṇatrayavibhāga Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . 43

15 Puruṣottama-Prāpti Yoga . . . . . . . . . . . . . . . . . . . . . . . . . 45

16 Daivāsura Sampad Vibhāga Yoga . . . . . . . . . . . . . . . . . . . . . 47

17 Śraddhātraya-Vibhāga Yoga . . . . . . . . . . . . . . . . . . . . . . . . 49

18 Mokṣa-Sannyāsa Yoga . . . . . . . . . . . . . . . . . . . . . . . . . . . 51

Closing Ślokas . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . 57

# Dhyāna Ślokas

श्री वल्लभा समाश्लिष्टं
दशहस्तं गजाननं |
गणनाथ महं वंदे
सर्व सिद्धि प्रदायकम् ||

प्रपन्न पारिजाताय
तोत्रवेत्रैक पाणये |
ज्ञानमुद्राय कृष्णाय
गीतांऋतदुहे नमः ||

व्यासाय विष्णु रूपाय
व्यास रूपाय विष्णवे |
नमो वै ब्रह्म निधये
वासिष्ठाय नमो नमः ||

सर्वोपनिषदो गावः
दोग्धा गोपालनन्दनः |
पार्थोवत्सः सुधीर्भोक्ता
दुग्धं गीतामृतं महत् ||

सच्चिदानन्द रुपाय
विश्वोत्पत्यादिहेतवे |
तापत्रयविनाशाय
श्री कृष्णाय नमो नमः ||

श्री कृष्णश्शरणं मम
श्री कृष्णश्शरणं मम
श्री कृष्णश्शरणं मम

# 1 Arjuna Viṣāda Yoga

1.0 ओं श्री परमात्मने नमः
अथ प्रथमोऽध्यायः
अर्जुनविषादयोगः

1.1 धृतराष्ट्र उवाच
धर्मक्षेत्रे कुरुक्षेत्रे
समवेता युयुत्सवः |
मामकाः पाण्डवाश्चैव
किमकुर्वत सञ्जय ||

1.2 सञ्जय उवाच
दृष्ट्वा तु पाण्डवानीकं
व्यूढं दुर्योधनस्तदा |
आचार्यमुपसङ्गम्य
राजा वचनमब्रवीत् ||

1.3 पश्यैतां पाण्डुपुत्राणाम्
आचार्य महतीं चमूम् |
व्यूढां द्रुपदपुत्रेण
तव शिष्येण धीमता ||

1.4 अत्र शूरा महेष्वासाः
भीमार्जुनसमा युधि |
युयुधानो विराटश्च
द्रुपदश्च महारथः ||

1.5 धृष्टकेतुश्चेकितानः
काशिराजश्च वीर्यवान् |
पुरुजित्कुन्तिभोजश्च
शैब्यश्च नरपुङ्गवः ||

1.6 युधामन्युश्च विक्रान्तः
उत्तमौजाश्च वीर्यवान् |
सौभद्रो द्रौपदेयाश्च
सर्व एव महारथाः ||

1.7 अस्माकं तु विशिष्टा ये
तान्निबोध द्विजोत्तम |
नायका मम सैन्यस्य
सञ्ज्ञार्थं तान्ब्रवीमि ते ||

1.8 भवान्भीष्मश्च कर्णश्च
कृपश्च समितिञ्जयः |
अश्वत्थामा विकर्णश्च
सौमदत्तिस्तथैव च ||

1.9 अन्ये च बहवः शूराः
मदर्थे त्यक्तजीविताः |
नानाशस्त्रप्रहरणाः
सर्वे युद्धविशारदाः ||

1.10 अपर्याप्तं तदस्माकं
बलं भीष्माभिरक्षितम् |
पर्याप्तं त्विदमेतेषां
बलं भीमाभिरक्षितम् ||

1.11 अयनेषु च सर्वेषु
यथाभागमवस्थिताः |
भीष्ममेवाभिरक्षन्तु
भवन्तः सर्व एव हि ||

1.12 तस्य सञ्जनयन्हर्षं
कुरुवृद्धः पितामहः |
सिंहनादं विनद्योच्चैः
शङ्खं दध्मौ प्रतापवान् ||

**1.13** ततः शङ्खाश्च भेर्यश्च
पणवानकगोमुखाः |
सहसैवाभ्यहन्यन्त
स शब्दस्तुमुलोऽभवत् ||

**1.14** ततः श्वेतैर्हयैर्युक्ते
महति स्यन्दने स्थितौ |
माधवः पाण्डवश्चैव
दिव्यौ शङ्खौ प्रदध्मतुः ||

**1.15** पाञ्चजन्यं हृषीकेशः
देवदत्तं धनञ्जयः |
पौण्ड्रं दध्मौ महाशङ्खं
भीमकर्मा वृकोदरः ||

**1.16** अनन्तविजयं राजा
कुन्तीपुत्रो युधिष्ठिरः |
नकुलः सहदेवश्च
सुघोषमणिपुष्पकौ ||

**1.17** काश्यश्च परमेष्वासः
शिखण्डी च महारथः |
धृष्टद्युम्नो विराटश्च
सात्यकिश्चापराजितः ||

**1.18** द्रुपदो द्रौपदेयाश्च
सर्वशः पृथिवीपते |
सोउभद्रश्च महाबाहुः
शङ्खान्दध्मुः पृथक्पृथक् ||

**1.19** स घोषो धार्तराष्ट्राणां
हृदयानि व्यदारयत् |
नभश्च पृथिवीं चैव
तुमुलो व्यनुनादयन् ||

**1.20** अथ व्यवस्थितान्दृष्ट्वा
धार्तराष्ट्रान् कपिध्वजः |
प्रवृत्ते शस्त्रसम्पाते
धनुरुद्यम्य पाण्डवः ||

**1.21** हृषीकेशं तदा वाक्यम्
इदमाह महीपते
अर्जुन उवाच |
सेनयोरुभयोर्मध्ये
रथं स्थापय मेऽच्युत ||

**1.22** यावदेतान्निरीक्षेऽहं
योद्धुकामानवस्थितान् |
कैर्मया सह योद्धव्यम्
अस्मिन् रणसमुद्यमे ||

**1.23** योत्स्यमानानवेक्षेऽहं
य एतेऽत्र समागताः |
धार्तराष्ट्रस्यदुर्बुद्धेः
युद्धे प्रियचिकीर्षवः ||

**1.24** सञ्जय उवाच
एवमुक्तो हृषीकेशः
गुडाकेशेन भारत |
सेनयोरुभयोर्मध्ये
स्थापयित्वा रथोत्तमम् ||

**1.25** भीष्मद्रोणप्रमुखतः
सर्वेषां च महीक्षिताम् |
उवाच पार्थ पश्यैतान्
समवेतान्कुरूनिति ||

**1.26** तत्रापश्यत्स्थितान्पार्थः
पितॄनथ पितामहान् |
आचार्यान्मातुलान्भ्रातॄन्
पुत्रान्पौत्रान्सखींस्तथा ||

**1.27** श्वशुरान्सुहृदश्चैव
सेनयोरुभयोरपि |
तान्समीक्ष्य स कौन्तेयः
सर्वान्बन्धूनवस्थितान् ||

1.28 कृपया परयाऽऽविष्टः
विषीदन्निदमब्रवीत्
अर्जुन उवाच |
दृष्ट्वेमं स्वजनं कृष्ण
युयुत्सुं समुपस्थितम् ||

1.29 सीदन्ति मम गात्राणि
मुखं च परिशुष्यति |
वेपथुश्च शरीरे मे
रोमहर्षश्च जायते ||

1.30 गाण्डीवं स्रंसते हस्तात्
त्वक्चैव परिदह्यते |
न च शक्नोम्यवस्थातुं
भ्रमतीव च मे मनः ||

1.31 निमित्तानि च पश्यामि
विपरीतानि केशव |
न च श्रेयोऽनुपश्यामि
हत्वा स्वजनमाहवे ||

1.32 न काङ्क्षे विजयं कृष्ण
न च राज्यं सुखानि च |
किं नो राज्येन गोविन्द
किं भोगैर्जीवितेन वा ||

1.33 येषामर्थे काङ्क्षितं नः
राज्यं भोगाः सुखानि च |
त इमेऽवस्थिता युद्धे
प्राणांस्त्यक्त्वा धनानि च ||

1.34 आचार्याः पितरः पुत्राः
तथैव च पितामहाः |
मातुलाः श्वशुराः पौत्राः
श्यालाः सम्बन्धिनस्तथा ||

1.35 एतान्न हन्तुमिच्छामि
घ्नतोऽपि मधुसूदन |
अपि त्रैलोक्यराज्यस्य
हेतोः किं नु महीकृते ||

1.36 निहत्य धार्तराष्ट्रान्नः
का प्रीतिः स्याज्जनार्दन |
पापमेवाश्रयेदस्मान्
हत्वैतानाततायिनः ||

1.37 तस्मान्नार्हा वयं हन्तुं
धार्तराष्ट्रान्स्वबान्धवान् |
स्वजनं हि कथं हत्वा
सुखिनः स्याम माधव ||

1.38 यद्यप्येते न पश्यन्ति
लोभोपहतचेतसः |
कुलक्षयकृतं दोषं
मित्रद्रोहे च पातकम् ||

1.39 कथं न ज्ञेयमस्माभिः
पापादस्मान्निवर्तितुम् |
कुलक्षयकृतं दोषं
प्रपश्यद्भिर्जनार्दन ||

1.40 कुलक्षये प्रणश्यन्ति
कुलधर्माः सनातनाः |
धर्मे नष्टे कुलं कृत्स्नम्
अधर्मोऽभिभवत्युत ||

1.41 अधर्माभिभवात्कृष्ण
प्रदुष्यन्ति कुलस्त्रियः |
स्त्रीषु दुष्टासु वार्ष्णेय
जायते वर्णसङ्करः ||

1.42 सङ्करो नरकायैव
कुलघ्नानां कुलस्य च |
पतन्ति पितरो ह्येषां
लुप्तपिण्डोदकक्रियाः ||

**1.43** दोषैरेतैः कुलघ्नानां
वर्णसङ्करकारकैः |
उत्साद्यन्ते जातिधर्माः
कुलधर्माश्च शाश्वताः ||

**1.44** उत्सन्नकुलधर्माणां
मनुष्याणां जनार्दन |
नरकेऽनियतं वासः
भवतीत्यनुशुश्रुम ||

**1.45** अहो बत महत्पापं
कर्तुं व्यवसिता वयम् |
यद्राज्यसुखलोभेन
हन्तुं स्वजनमुद्यताः ||

**1.46** यदि मामप्रतीकारम्
अशस्त्रं शस्त्रपाणयः |
धार्तराष्ट्रा रणे हन्युः
तन्मे क्षेमतरं भवेत् ||

**1.47** सञ्जय उवाच
एवमुक्त्वाऽर्जुनः सङ्ख्ये
रथोपस्थ उपाविशत् |
विसृज्य सशरं चापं
शोकसंविग्नमानसः ||

# 2 Sāṅkhya Yoga

2.0 ओं श्री परमात्मने नमः
अथ द्वितीयोऽध्यायः
साङ्ख्ययोगः

2.1 संजय उवाच
तं तथा कृपयाविष्टम्
अश्रुपूर्णाकुलेक्षणम् |
विषीदंतमिदं वाक्यम्
उवाच मधुसूदनः ||

2.2 श्री भगवानुवाच
कुतस्त्वा कश्मलमिदं
विषमे समुपस्थितम् |
अनार्यजुष्टमस्वर्ग्यम्
अकीर्तिकरमर्जुन ||

2.3 क्लैब्यं मा स्म गमः पार्थ
नैतत्त्वय्युपपद्यते |
क्षुद्रं हृदयदौर्बल्यं
त्यक्त्वोत्तिष्ठ परंतप ||

2.4 अर्जुन उवाच
कथं भीश्ममहं संख्ये
द्रोणं च मधुसूदन |
इशुभिः प्रतियोत्स्यामि
पूजार्हावरिसूदन ||

2.5 गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके |
हत्वार्थकामंस्तु गुरूनिहैव
भुंजीय भोगान् रुधिरप्रदिग्धान् ||

2.6 न चैतद्विद्मः कतरन्नो गरीयः
यद्वा जयेम यदि वा नो जयेयुः |
यानेव हत्वा न जिजीविषामः
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ||

2.7 कार्पन्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसम्मूढचेताः |
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ||

2.8 न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम् |
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ||

2.9 संजय उवाच
एवमुक्त्वा हृषीकेशं
गुडाकेशः परन्तपः |
न योत्स्य इति गोविंदम्
उक्त्वा तूष्णीम् बभूव ह ||

2.10 तमुवाच हृषीकेशः
प्रहसन्निव भारत |
सेनयोरुभयोर्मध्ये
विषीदंतमिदं वचः ||

2.11 श्री भगवानुवाच
अशोच्यानन्वशोचस्त्वं
प्रज्ञावादांश्च भाषसे |
गतासूनगतासूंश्च
नानुशोचन्ति पण्डिताः ||

2.12 न त्वेवाहं जातु नासं
न त्वं नेमे जनाधिपाः |
न चैव न भविष्यामः
सर्वे वयमतः परम् ||

2.13 देहिनोऽस्मिन् यथा देहे
कौमारं यौवनं जरा |
तथा देहांतरप्राप्तिः
धीरस्तत्र न मुह्यति ||

2.14 मात्रास्पर्शास्तु कौंतेय
शीतोष्णसुखदुःखदाः |
आगमापायिनोऽनित्याः
तांस्तितिक्षस्व भारत ||

2.15 यं हि न व्यथयंत्येते
पुरुषं पुरुषर्षभ |
समदुःखसुखं धीरं
सोऽमृतत्वाय कल्पते ||

2.16 नासतो विद्यते भावः
नाभावो विद्यते सतः |
उभयोरपि दृष्टोऽन्तः
त्वनयोस्तत्त्वदर्शिभिः ||

2.17 अविनाशि तु तद्विद्धि
येन सर्वमिदं ततम् |
विनाशमव्ययस्यास्य
न कश्चित्कर्तुमर्हति ||

2.18 अंतवन्त इमे देहाः
नित्यस्योक्ताः शरीरिणः |
अनाशिनोऽप्रमेयस्य
तस्माद्युध्यस्व भारत ||

2.19 य एनं वेत्ति हन्तारं
यश्चैनं मन्यते हतं |
उभौ तौ न विजानीतः
नायं हन्ति न हन्यते ||

2.20 न जायते म्रियते वा कदाचित्
नायं भूत्वा भविता वा न भूयः |
अजो नित्यः शाश्वतोऽयं पुराणः
न हन्यते हन्यमाने शरीरे ||

2.21 वेदाविनाशिनं नित्यं
य एनमजमव्ययम् |
कथं स पुरुषः पार्थ
कं घातयति हंति कम् ||

2.22 वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि |
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही ||

2.23 नैनं छिन्दन्ति शस्त्राणि
नैनं दहति पावकः |
न चैनं क्लेदयन्त्यापः
न शोषयति मारुतः ||

2.24 अच्छेद्योऽयम् अदाह्योऽयम्
अक्लेद्योऽशोष्य एव च |
नित्यः सर्वगतः स्थाणुः
अचलोऽयं सनातनः ||

2.25 अव्यक्तोऽयम् अचिन्त्योऽयम्
अविकार्योऽयमुच्यते |
तस्मादेवं विदित्वैनं
नानुशोचितुमर्हसि ||

2.26 अथ चैनं नित्यजातं
नित्यं वा मन्यसे मृतम् |
तथाऽपि त्वं महाबाहो
नैवं शोचितुमर्हसि ||

**2.27** जातस्य हि ध्रुवो मृत्युः
ध्रुवं जन्म मृतस्य च |
तस्मादपरिहार्येऽर्थे
न त्वं शोचितुमर्हसि ||

**2.28** अव्यक्तादीनि भूतानि
व्यक्तमध्यानि भारत |
अव्यक्तनिधनान्येव
तत्र का परिदेवना ||

**2.29** आश्चर्यवत् पश्यति कश्चिदेनम्
आश्चर्यवद् वदति तथैव चान्यः |
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ||

**2.30** देही नित्यमवध्योऽयं
देहे सर्वस्य भारत |
तस्मात्सर्वाणि भूतानि
न त्वं शोचितुमर्हसि ||

**2.31** स्वधर्ममपि चावेक्ष्य
न विकम्पितुमर्हसि |
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्
क्षत्रियस्यनविद्यते ||

**2.32** यदृच्छया चोपपन्नं
स्वर्गद्वारमपावृतम् |
सुखिनः क्षत्रियाः पार्थ
लभन्ते युद्धमीदृशम् ||

**2.33** अथ चेत्त्वमिमं धर्म्यं
सङ्ग्रामं न करिष्यसि |
ततः स्वधर्मं कीर्तिं च
हित्वा पापमवाप्स्यसि ||

**2.34** अकीर्तिं चापि भूतानि
कथयिष्यन्ति तेऽव्ययाम् |
सम्भावितस्य चाकीर्तिः
मरणादतिरिच्यते ||

**2.35** भयाद्रणादुपरतं
मंस्यन्ते त्वां महारथाः |
येषां च त्वं बहुमतः
भूत्वा यास्यसि लाघवम् ||

**2.36** अवाच्यवादांश्च बहून्
वदिष्यन्ति तवाहिताः |
निन्दन्तस्तव सामर्थ्यं
ततो दुःखतरं नु किम् ||

**2.37** हतो वा प्राप्स्यसि स्वर्गं
जित्वा वा भोक्ष्यसे महीम् |
तस्मादुत्तिष्ठ कौन्तेय
युद्धाय कृतनिश्चयः ||

**2.38** सुखदुःखे समे कृत्वा
लाभालाभौ जयाजयौ |
ततो युद्धाय युज्यस्व
नैवं पापमवाप्स्यसि ||

**2.39** एषा तेऽभिहिता साङ्ख्ये
बुद्धिर्योगे त्विमां शृणु |
बुद्ध्या युक्तो यया पार्थ
कर्मबन्धं प्रहास्यसि ||

**2.40** नेहाभिक्रमनाशोऽस्ति
प्रत्यवायो न विद्यते |
स्वल्पमप्यस्य धर्मस्य
त्रायते महतो भयात् ||

**2.41** व्यवसायात्मिका बुद्धिः
एकेह कुरुनन्दन |
बहुशाखा ह्यनन्ताश्च
बुद्धयोऽव्यवसायिनाम् ||

**2.42** यामिमां पुष्पितां वाचं
प्रवदन्त्यविपश्चितः |
वेदवादरताः पार्थ
नान्यदस्तीति वादिनः ||

2.43 कामात्मानः स्वर्गपराः
जन्मकर्मफलप्रदाम् |
क्रियाविशेषबहुलां
भोगैश्वर्यगतिं प्रति ||

2.44 भोगैश्वर्यप्रसक्तानां
तयाऽपहृतचेतसाम् |
व्यवसायात्मिका बुद्धिः
समाधौ न विधीयते ||

2.45 त्रैगुण्यविषया वेदाः
निस्त्रैगुण्यो भवार्जुन |
निर्द्वन्द्वो नित्यसत्त्वस्थः
निर्योगक्षेम आत्मवान् ||

2.46 यावानर्थ उदपाने
सर्वतः सम्प्लुतोदके |
तावान्सर्वेषु वेदेषु
ब्राह्मणस्य विजानतः ||

2.47 कर्मण्येवाधिकारस्ते
मा फलेषु कदाचन |
मा कर्मफलहेतुर्भूः
मा ते सङ्गोऽस्त्वकर्मणि ||

2.48 योगस्थः कुरु कर्माणि
सङ्गं त्यक्त्वा धनञ्जय |
सिद्ध्यसिद्ध्योः समो भूत्वा
समत्वं योग उच्यते ||

2.49 दूरेण ह्यवरं कर्म
बुद्धियोगाद्धनञ्जय |
बुद्धौ शरणमन्विच्छ
कृपणाः फलहेतवः ||

2.50 बुद्धियुक्तो जहातीह
उभे सुकृतदुष्कृते |
तस्माद्योगाय युज्यस्व
योगः कर्मसु कौशलम् ||

2.51 कर्मजं बुद्धियुक्ता हि
फलं त्यक्त्वा मनीषिणः |
जन्मबन्धविनिर्मुक्ताः
पदं गच्छन्त्यनामयम् ||

2.52 यदा ते मोहकलिलं
बुद्धिर् व्यतितरिष्यति |
तदा गन्तासि निर्वेदं
श्रोतव्यस्य श्रुतस्य च ||

2.53 श्रुतिविप्रतिपन्ना ते
यदा स्थास्यति निश्चला |
समाधावचला बुद्धिः
तदा योगमवाप्स्यसि ||

2.54 अर्जुन उवाच
स्थितप्रज्ञस्य का भाषा
समाधिस्थस्य केशव |
स्थितधीः किं प्रभाषेत
किमासीत व्रजेत किम् ||

2.55 श्री भगवान् उवाच
प्रजहाति यदा कामान्
सर्वान्पार्थ मनोगतान् |
आत्मन्येवात्मना तुष्टः
स्थितप्रज्ञस् तदोच्यते ||

2.56 दुःखेष्वनुद्विग्नमनाः
सुखेषु विगतस्पृहः |
वीतरागभयक्रोधः
स्थितधीर्मुनिरुच्यते ||

2.57 यः सर्वत्रानभिस्नेहः
तत्तत्प्राप्य शुभाशुभम् |
नाभिनन्दति न द्वेष्टि
तस्य प्रज्ञा प्रतिष्ठिता ||

2.58 यदा सम्हरते चायं
कूर्मोऽङ्गानीव सर्वशः |
इन्द्रियाणीन्द्रियार्थेभ्यः
तस्य प्रज्ञा प्रतिष्ठिता ||

2.59 विषया विनिवर्तन्ते
निराहारस्य देहिनः |
रसवर्जं रसोऽप्यस्य
परं दृष्ट्वा निवर्तते ||

2.60 यततो ह्यपि कौन्तेय
पुरुषस्य विपश्चितः |
इन्द्रियाणि प्रमाथीनि
हरन्ति प्रसभं मनः ||

2.61 तानि सर्वाणि सम्यम्य
युक्त आसीत मत्परः |
वशे हि यस्येन्द्रियाणि
तस्य प्रज्ञा प्रतिष्ठिता ||

2.62 ध्यायतो विषयान्पुंसः
सङ्गस्तेषूपजायते |
सङ्गात्सञ्जायते कामः
कामात्क्रोधोऽभिजायते ||

2.63 क्रोधाद् भवति सम्मोहः
सम्मोहात् स्मृतिविभ्रमः |
स्मृतिभ्रम्शात् बुद्धिनाशः
बुद्धिनाशात्प्रणश्यति ||

2.64 रागद्वेषवियुक्तैस्तु
विषयानिन्द्रियैश्चरन् |
आत्मवश्यैर्विधेयात्मा
प्रसादमधिगच्छति ||

2.65 प्रसादे सर्वदुःखानां
हानिरस्योपजायते |
प्रसन्नचेतसो ह्याशु
बुद्धिः पर्यवतिष्ठते ||

2.66 नास्ति बुद्धिरयुक्तस्य
न चायुक्तस्य भावना |
न चाभावयतः शान्तिः
अशान्तस्य कुतः सुखम् ||

2.67 इन्द्रियाणां हि चरतां
यन्मनोऽनुविधीयते |
तदस्य हरति प्रज्ञां
वायुर्नावमिवाम्भसि ||

2.68 तस्माद् यस्य महाबाहो
निगृहीतानि सर्वशः |
इन्द्रियाणीन्द्रियार्थेभ्यः
तस्य प्रज्ञा प्रतिष्ठिता ||

2.69 या निशा सर्वभूतानां
तस्यां जागर्ति संयमी |
यस्यां जाग्रति भूतानि
सा निशा पश्यतो मुनेः ||

2.70 आपुर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् |
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ||

2.71 विहाय कामान् यः सर्वान्
पुमाम्श्चरति निस्स्पृहः |
निर्ममो निरहन्कारः
स शान्तिमधिगच्छति ||

2.72 एषा ब्राह्मी स्थितिः पार्थ
नैनां प्राप्य विमुह्यति |
स्थित्वास्यामन्तकालेऽपि
ब्रह्मनिर्वाणमृच्छति ||

# 3 Karma Yoga

3.0 ओं श्री परमात्मने नमः
अथ तृतीयोऽध्यायः
कर्मयोगः

3.1 अर्जुन उवाच
ज्यायसी चेत्कर्मणस्ते
मता बुद्धिर्जनार्दन |
तत्किं कर्मणि घोरे मां
नियोजयसि केशव ||

3.2 व्यामिश्रेणेव वाक्येन
बुद्धिं मोहयसीव मे |
तदेकं वद निश्चित्य
येन श्रेयोऽहमाप्नुयाम् ||

3.3 स्री भगवानुवाच
लोकेऽस्मिन्द्विविधा निष्ठा
पुरा प्रोक्ता मयाऽनघ |
ज्ञानयोगेन साङ्ख्यानां
कर्मयोगेन योगिनाम् ||

3.4 न कर्मणामनारम्भात्
नैष्कर्म्यं पुरुषोऽश्नुते |
न च सन्न्यसनादेव
सिद्धिं समधिगच्छति ||

3.5 न हि कश्चित्क्षणमपि
जातु तिष्ठत्यकर्मकृत् |
कार्यते ह्यवशः कर्म
सर्वः प्रकृतिजैर्गुणैः ||

3.6 कर्मेन्द्रियाणि संयम्य
य आस्ते मनसा स्मरन् |
इन्द्रियार्थान्विमूढात्मा
मिथ्याचारः स उच्यते ||

3.7 यस्त्विन्द्रियाणि मनसा
नियम्यारभतेऽर्जुन |
कर्मेन्द्रियैः कर्मयोगम्
असक्तः स विशिष्यते ||

3.8 नियतं कुरु कर्म त्वं
कर्म ज्यायो ह्यकर्मणः |
शरीरयात्राऽपि च ते
न प्रसिद्ध्येदकर्मणः ||

3.9 यज्ञार्थात्कर्मणोऽन्यत्र
लोकोऽयं कर्मबन्धनः |
तदर्थं कर्म कौन्तेय
मुक्तसङ्गः समाचर ||

3.10 सहयज्ञाः प्रजाः सृष्ट्वा
पुरोवाच प्रजापतिः |
अनेन प्रसविष्यध्वं
एष वोऽस्त्विष्टकामधुक् ||

3.11 देवान्भावयताऽनेन
ते देवा भावयन्तु वः |
परस्परं भावयन्तः
श्रेयः परमवाप्स्यथ ||

3.12 इष्टान्भोगान्हि वो देवाः
दास्यन्ते यज्ञभाविताः |
तैर्दत्तानप्रदायैभ्यः
यो भुङ्क्ते स्तेन एव सः ||

**3.13** यज्ञशिष्टाशिनः सन्तः
मुच्यन्ते सर्वकिल्बिषैः |
भुञ्जते ते त्वघं पापाः
ये पचन्त्यात्मकारणात् ||

**3.14** अन्नाद्भवन्ति भूतानि
पर्जन्यादन्नसम्भवः |
यज्ञाद्भवति पर्जन्यः
यज्ञः कर्मसमुद्भवः ||

**3.15** कर्म ब्रह्मोद्भवं विद्धि
ब्रह्माक्षरसमुद्भवम् |
तस्मात्सर्वगतं ब्रह्म
नित्यं यज्ञे प्रतिष्ठितम् ||

**3.16** एवं प्रवर्तितं चक्रं
नानुवर्तयतीह यः |
अघायुरिन्द्रियारामः
मोघं पार्थ स जीवति ||

**3.17** यस्त्वात्मरतिरेव स्यात्
आत्मतृप्तश्च मानवः |
आत्मन्येव च सन्तुष्टः
तस्य कार्यं न विद्यते ||

**3.18** नैव तस्य कृतेनार्थः
नाकृतेनेह कश्चन |
न चास्य सर्वभूतेषु
कश्चिदर्थव्यपाश्रयः ||

**3.19** तस्मादसक्तः सततं
कार्यं कर्म समाचर |
असक्तो ह्याचरन्कर्म
परमाप्नोति पूरुषः ||

**3.20** कर्मणैव हि संसिद्धिं
आस्थिता जनकादयः |
लोकसङ्ग्रहमेवापि
सम्पश्यन्कर्तुमर्हसि ||

**3.21** यद्यदाचरति श्रेष्ठः
तत्तदेवेतरो जनः |
स यत्प्रमाणं कुरुते
लोकस्तदनुवर्तते ||

**3.22** न मे पार्थास्ति कर्तव्यं
त्रिषु लोकेषु किञ्चन |
नानवाप्तमवाप्तव्यं
वर्त एव च कर्मणि ||

**3.23** यदि ह्यहं न वर्तेय
जातु कर्मण्यतन्द्रितः |
मम वर्त्मानुवर्तन्ते
मनुष्याः पार्थ सर्वशः ||

**3.24** उत्सीदेयुरिमे लोकाः
न कुर्यां कर्म चेदहम् |
सङ्करस्य च कर्ता स्याम्
उपहन्यामिमाः प्रजाः ||

**3.25** सक्ताः कर्मण्यविद्वांसः
यथा कुर्वन्ति भारत |
कुर्याद्विद्वांस्तथाऽसक्तः
चिकीर्षुर्लोकसङ्ग्रहम् ||

**3.26** न बुद्धिभेदं जनयेत्
अज्ञानां कर्मसङ्गिनाम् |
जोषयेत्सर्वकर्माणि
विद्वान्युक्तः समाचरन् ||

**3.27** प्रकृतेः क्रियमाणानि
गुणैः कर्माणि सर्वशः |
अहङ्कारविमूढात्मा
कर्ताऽहमिति मन्यते ||

**3.28** तत्त्ववित्तु महाबाहो
गुणकर्मविभागयोः |
गुणा गुणेषु वर्तन्ते
इति मत्वा न सज्जते ||

**3.29** प्रकृतेर्गुणसम्मूढाः
सज्जन्ते गुणकर्मसु |
तानकृत्स्नविदो मन्दान्
कृत्स्नविन्न विचालयेत् ||

**3.30** मयि सर्वाणि कर्माणि
सन्न्यस्याध्यात्मचेतसा |
निराशीर्निर्ममो भूत्वा
युध्यस्व विगतज्वरः ||

**3.31** ये मे मतमिदं नित्यम्
अनुतिष्ठन्ति मानवाः |
श्रद्धावन्तोऽनसूयन्तः
मुच्यन्ते तेऽपि कर्मभिः ||

**3.32** ये त्वेतदभ्यसूयन्तः
नानुतिष्ठन्ति मे मतम् |
सर्वज्ञानविमूढांस्तान्
विद्धि नष्टानचेतसः ||

**3.33** सदृशं चेष्टते स्वस्याः
प्रकृतेर्ज्ञानवानपि |
प्रकृतिं यान्ति भूतानि
निग्रहः किं करिष्यति ||

**3.34** इन्द्रियस्येन्द्रियस्यार्थे
रागद्वेषौ व्यवस्थितौ |
तयोर्न वशमागच्छेत्
तौ ह्यस्य परिपन्थिनौ ||

**3.35** श्रेयान्स्वधर्मो विगुणः
परधर्मात्स्वनुष्ठितात् |
स्वधर्मे निधनं श्रेयः
परधर्मो भयावहः ||

**3.36** अर्जुन उवाच
अथ केन प्रयुक्तोऽयं
पापं चरति पूरुषः |
अनिच्छन्नपि वार्ष्णेय
बलादिव नियोजितः ||

**3.37** श्री भगवानुवाच
काम एष क्रोध एषः
रजोगुणसमुद्भवः |
महाशनो महापाप्मा
विद्ध्येनमिह वैरिणम् ||

**3.38** धूमेनाव्रियते वह्निः
यथाऽदर्शो मलेन च |
यथोल्बेनावृतो गर्भः
तथा तेनेदमावृतम् ||

**3.39** आवृतं ज्ञानमेतेन
ज्ञानिनो नित्यवैरिणा |
कामरूपेण कौन्तेय
दुष्पूरेणानलेन च ||

**3.40** इन्द्रियाणि मनो बुद्धिः
अस्याधिष्ठानमुच्यते |
एतैर्विमोहयत्येषः
ज्ञानमावृत्य देहिनम् ||

**3.41** तस्मात्त्वमिन्द्रियाण्यादौ
नियम्य भरतर्षभ |
पाप्मानं प्रजहि ह्येनं
ज्ञानविज्ञाननाशनम् ||

**3.42** इन्द्रियाणि पराण्याहुः
इन्द्रियेभ्यः परं मनः |
मनसस्तु पराबुद्धिः
यो बुद्धेः परतस्तु सः ||

**3.43** एवं बुद्धेः परं बुद्ध्वा
संस्तभ्यात्मानमात्मना |
जहि शत्रुं महाबाहो
कामरूपं दुरासदम् ||

# 4 Jñāna Yoga

4.0 ओं श्री परमात्मने नमः
अथ चतुर्थोऽध्यायः
ज्ञानयोगः

4.1 श्री भगवानुवाच
इमं विवस्वते योगं
प्रोक्तवानहमव्ययम् |
विवस्वान्मनवे प्राह
मनुरिक्ष्वाकवेऽब्रवीत् ||

4.2 एवं परम्पराप्राप्तम्
इमं राजर्षयो विदुः |
स कालेनेह महता
योगो नष्टः परन्तप ||

4.3 स एवायं मया तेऽद्य
योगः प्रोक्तः पुरातनः |
भक्तोऽसि मे सखा चेति
रहस्यं ह्येतदुत्तमम् ||

4.4 अर्जुन उवाच
अपरं भवतो जन्म
परं जन्म विवस्वतः |
कथमेतद्विजानीयां
त्वमादौ प्रोक्तवानिति ||

4.5 श्री भगवानुवाच
बहूनि मे व्यतीतानि
जन्मानि तव चार्जुन |
तान्यहं वेद सर्वाणि
न त्वं वेत्थ परन्तप ||

4.6 अजोऽपि सन्नव्ययात्मा
भूतानामीश्वरोऽपि सन् |
प्रकृतिं स्वामधिष्ठाय
सम्भवाम्यात्ममायया ||

4.7 यदा यदा हि धर्मस्य
ग्लानिर्भवति भारत |
अभ्युत्थानमधर्मस्य
तदाऽऽत्मानं सृजाम्यहम् ||

4.8 परित्राणाय साधूनां
विनाशाय च दुष्कृताम् |
धर्मसंस्थापनार्थाय
सम्भवामि युगे युगे ||

4.9 जन्म कर्म च मे दिव्यम्
एवं यो वेत्ति तत्त्वतः |
त्यक्त्वा देहं पुनर्जन्म
नैति मामेति सोऽर्जुन ||

4.10 वीतरागभयक्रोधाः
मन्मया मामुपाश्रिताः |
बहवो ज्ञानतपसा
पूता मद्भावमागताः ||

4.11 ये यथा मां प्रपद्यन्ते
तांस्तथैव भजाम्यहम् |
मम वर्त्मानुवर्तन्ते
मनुष्याः पार्थ सर्वशः ||

4.12 काङ्क्षन्तः कर्मणां सिद्धिं
यजन्त इह देवताः |
क्षिप्रं हि मानुषे लोके
सिद्धिर्भवति कर्मजा ||

4.13 चातुर्वर्ण्यं मया सृष्टं
गुणकर्मविभागशः |
तस्य कर्तारमपि मां
विद्ध्यकर्तारमव्ययम् ||

4.14 न मां कर्माणि लिम्पन्ति
न मे कर्मफले स्पृहा |
इति मां योऽभिजानाति
कर्मभिर्न स बध्यते ||

4.15 एवं ज्ञात्वा कृतं कर्म
पूर्वैरपि मुमुक्षुभिः |
कुरु कर्मैव तस्मात्त्वं
पूर्वैः पूर्वतरं कृतम् ||

4.16 किं कर्म किमकर्मेति
कवयोऽप्यत्र मोहिताः |
तत्ते कर्म प्रवक्ष्यामि
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ||

4.17 कर्मणो ह्यपि बोद्धव्यं
बोद्धव्यं च विकर्मणः |
अकर्मणश्च बोद्धव्यं
गहना कर्मणो गतिः ||

4.18 कर्मण्यकर्म यः पश्येत्
अकर्मणिच कर्म यः |
स बुद्धिमान्मनुष्येषु
स युक्तः कृत्स्नकर्मकृत् ||

4.19 यस्य सर्वे समारम्भाः
कामसङ्कल्पवर्जिताः |
ज्ञानाग्निदग्धकर्माणं
तमाहुः पण्डितं बुधाः ||

4.20 त्यक्त्वा कर्मफलासङ्गं
नित्यतृप्तो निराश्रयः |
कर्मण्यभिप्रवृत्तोऽपि
नैव किञ्चित्करोति सः ||

4.21 निराशीर्यतचित्तात्मा
त्यक्तसर्व परिग्रहः |
शारीरं केवलं कर्म
कुर्वन्नाप्नोति किल्बिषम् ||

4.22 यदृच्छालाभसन्तुष्टः
द्वन्द्वातीतो विमत्सरः |
समः सिद्धावसिद्धौ च
कृत्वापि न निबध्यते ||

4.23 गतसङ्गस्य मुक्तस्य
ज्ञानावस्थितचेतसः |
यज्ञायाचरतः कर्म
समग्रं प्रविलीयते ||

4.24 ब्रह्मार्पणं ब्रह्म हविः
ब्रह्माग्नौ ब्रह्मणा हुतम् |
ब्रह्मैव तेन गन्तव्यं
ब्रह्मकर्मसमाधिना ||

4.25 दैवमेवापरे यज्ञं
योगिनः पर्युपासते |
ब्रह्माग्नावपरे यज्ञं
यज्ञेनैवोपजुह्वति ||

4.26 श्रोत्रादीनीन्द्रियाण्यन्ये
संयमाग्निषु जुह्वति |
शब्दादीन्विषयानन्ये
इन्द्रियाग्निषु जुह्वति ||

4.27 सर्वाणीन्द्रियकर्माणि
प्राणकर्माणि चापरे |
आत्मसंयमयोगाग्नौ
जुह्वति ज्ञानदीपिते ||

**4.28** द्रव्ययज्ञास्तपोयज्ञाः
योगयज्ञास्तथाऽपरे |
स्वाध्यायज्ञानयज्ञाश्च
यतयः संशितव्रताः ||

**4.29** अपाने जुह्वति प्राणं
प्राणेऽपानं तथापरे |
प्राणापानगती रुद्ध्वा
प्राणायामपरायणाः ||

**4.30** अपरे नियताहाराः
प्राणान्प्राणेषु जुह्वति |
सर्वेऽप्येते यज्ञविदः
यज्ञक्षपितकल्मषाः ||

**4.31** यज्ञशिष्टामृतभुजः
यान्ति ब्रह्म सनातनम् |
नायं लोकोऽस्त्ययज्ञस्य
कुतोऽन्यः कुरुसत्तम ||

**4.32** एवं बहुविधा यज्ञाः
वितता ब्रह्मणो मुखे |
कर्मजान्विद्धि तान्सर्वान्
एवं ज्ञात्वा विमोक्ष्यसे ||

**4.33** श्रेयान्द्रव्यमयाद्यज्ञात्
ज्ञानयज्ञः परन्तप |
सर्वं कर्माखिलं पार्थ
ज्ञाने परिसमाप्यते ||

**4.34** तद्विद्धि प्रणिपातेन
परिप्रश्नेन सेवया |
उपदेक्ष्यन्ति ते ज्ञानं
ज्ञानिनस्तत्त्वदर्शिनः ||

**4.35** यज्ज्ञात्वा न पुनर्मोहम्
एवं यास्यसि पाण्डव |
येन भूतान्यशेषेण
द्रक्ष्यस्यात्मन्यथो मयि ||

**4.36** अपि चेदसि पापेभ्यः
सर्वेभ्यः पापकृत्तमः |
सर्वं ज्ञानप्लवेनैव
वृजिनं सन्तरिष्यसि ||

**4.37** यथैधांसि समिद्धोऽग्निः
भस्मसात्कुरुतेऽर्जुन |
ज्ञानाग्निः सर्वकर्माणि
भस्मसात्कुरुते तथा ||

**4.38** न हि ज्ञानेन सदृशं
पवित्रमिह विद्यते |
तत्स्वयं योगसंसिद्धः
कालेनात्मनि विन्दति ||

**4.39** श्रद्धावान् लभते ज्ञानं
तत्परः संयतेन्द्रियः |
ज्ञानं लब्ध्वा परां शान्तिम्
अचिरेणाधिगच्छति ||

**4.40** अज्ञश्चाश्रद्दधानश्च
संशयात्मा विनश्यति |
नायं लोकोऽस्ति न परः
न सुखं संशयात्मनः ||

**4.41** योगसन्न्यस्तकर्माणं
ज्ञानसञ्छिन्नसंशयम् |
आत्मवन्तं न कर्माणि
निबध्नन्ति धनञ्जय ||

**4.42** तस्मादज्ञानसम्भूतं
हृत्स्थं ज्ञानासिनात्मनः |
छित्त्वैनं संशयं योगम्
आतिष्ठोत्तिष्ठ भारत ||

# 5 Karma-Sannyāsa Yoga

5.0 ओं श्री परमात्मने नमः
अथ पञ्चमोऽध्यायः
कर्मसन्न्यासयोगः

5.1 अर्जुन उवाच
सन्न्यासं कर्मणां कृष्ण
पुनर्योगं च शंससि |
यच्छ्रेय एतयोरेकं
तन्मे ब्रूहि सुनिश्चितम् ||

5.2 श्री भगवानुवाच
सन्न्यासः कर्मयोगश्च
निश्श्रेयसकरावुभौ |
तयोस्तु कर्मसन्न्यासात्
कर्मयोगो विशिष्यते ||

5.3 ज्ञेयः स नित्यसन्न्यासी
यो न द्वेष्टि न काङ्क्षति |
निर्द्वन्द्वो हि महाबाहो
सुखं बन्धात्प्रमुच्यते ||

5.4 साङ्ख्ययोगौ पृथग्बालाः
प्रवदन्ति न पण्डिताः |
एकमप्यास्थितः सम्यक्
उभयोर्विन्दते फलम् ||

5.5 यत्साङ्ख्यैः प्राप्यते स्थानं
तद्योगैरपि गम्यते |
एकं साङ्ख्यं च योगं च
यः पश्यति स पश्यति ||

5.6 सन्न्यासस्तु महाबाहो
दुःखमाप्तुमयोगतः |
योगयुक्तो मुनिर्ब्रह्म
नचिरेणाधिगच्छति ||

5.7 योगयुक्तो विशुद्धात्मा
विजितात्मा जितेन्द्रियः |
सर्वभूतात्मभूतात्मा
कुर्वन्नपि न लिप्यते ||

5.8 नैव किञ्चित्करोमीति
युक्तो मन्येत तत्त्ववित् |
पश्यन्शृण्वन् स्पृशञ्जिघ्रन्
अश्नन्गच्छन्स्वपन्श्वसन् ||

5.9 प्रलपन् विसृजन् गृह्णन्
उन्मिषन्निमिषन्नपि |
इन्द्रियाणीन्द्रियार्थेषु
वर्तन्त इति धारयन् ||

5.10 ब्रह्मण्याधाय कर्माणि
सङ्गं त्यक्त्वा करोति यः |
लिप्यते न स पापेन
पद्मपत्रमिवाम्भसा ||

5.11 कायेन मनसा बुद्ध्या
केवलैरिन्द्रियैरपि |
योगिनः कर्म कुर्वन्ति
सङ्गं त्यक्त्वात्मशुद्धये ||

5.12 युक्तः कर्मफलं त्यक्त्वा
शान्तिमाप्नोति नैष्ठिकीम् |
अयुक्तः कामकारेण
फले सक्तो निबध्यते ||

**5.13** सर्वकर्माणि मनसा
सन्न्यस्यास्ते सुखं वशी |
नवद्वारे पुरे देही
नैव कुर्वन्न कारयन् ||

**5.14** न कर्तृत्वं न कर्माणि
लोकस्य सृजति प्रभुः |
न कर्मफलसंयोगं
स्वभावस्तु प्रवर्तते ||

**5.15** नादत्ते कस्यचित्पापं
न चैव सुकृतं विभुः |
अज्ञानेनावृतं ज्ञानं
तेन मुह्यन्ति जन्तवः ||

**5.16** ज्ञानेन तु तदज्ञानं
येषां नाशितमात्मनः |
तेषामादित्यवज्ज्ञानं
प्रकाशयति तत्परम् ||

**5.17** तद्बुद्धयस्तदात्मानः
तन्निष्ठास्तत्परायणाः |
गच्छन्त्यपुनरावृत्तिं
ज्ञाननिर्धूतकल्मषाः ||

**5.18** विद्याविनयसम्पन्ने
ब्राह्मणे गवि हस्तिनि |
शुनि चैव श्वपाके च
पण्डिताः समदर्शिनः ||

**5.19** इहैव तैर्जितः सर्गः
येषां साम्ये स्थितं मनः |
निर्दोषं हि समं ब्रह्म
तस्मात् ब्रह्मणि ते स्थिताः ||

**5.20** न प्रहृष्येत्प्रियं प्राप्य
नोद्विजेत्प्राप्य चाप्रियम् |
स्थिरबुद्धिरसम्मूढः
ब्रह्मवित् ब्रह्मणि स्थितः ||

**5.21** बाह्यस्पर्शेष्वसक्तात्मा
विन्दत्यात्मनि यत् सुखम् |
स ब्रह्मयोगयुक्तात्मा
सुखमक्षयमश्नुते ||

**5.22** ये हि संस्पर्शजा भोगाः
दुःखयोनय एव ते |
आद्यन्तवन्तः कौन्तेय
न तेषु रमते बुधः ||

**5.23** शक्नोतीहैव यः सोढुं
प्राक् शरीरविमोक्षणात् |
कामक्रोधोद्भवं वेगं
स युक्तः स सुखी नरः ||

**5.24** योऽन्तःसुखोऽन्तरारामः
तथान्तर्ज्योतिरेव यः |
स योगी ब्रह्मनिर्वाणं
ब्रह्मभूतोऽधिगच्छति ||

**5.25** लभन्ते ब्रह्मनिर्वाणम्
ऋषयः क्षीणकल्मषाः |
छिन्नद्वैधा यतात्मानः
सर्वभूतहिते रताः ||

**5.26** कामक्रोधवियुक्तानां
यतीनां यतचेतसाम् |
अभितो ब्रह्मनिर्वाणं
वर्तते विदितात्मनाम् ||

**5.27** स्पर्शान् कृत्वा बहिर्बाह्यान्
चक्षुश्चैवान्तरे भ्रुवोः |
प्राणापानौ समौ कृत्वा
नासाभ्यन्तरचारिणौ ||

**5.28** यतेन्द्रियमनोबुद्धिः
मुनिर्मोक्षपरायणः |
विगतेच्छाभयक्रोधः
यः सदा मुक्त एव सः ||

**5.29** भोक्तारं यज्ञतपसां
सर्वलोकमहेश्वरम् |
सुहृदं सर्वभूतानां
ज्ञात्वा मां शान्तिमृच्छति । ||

# 6 Ātma-Saṃyama Yoga

6.0 ओं श्री परमात्मने नमः
अथ षष्ठोऽध्यायः
आत्मसंयमयोगः

6.1 श्री भगवानुवाच
अनाश्रितः कर्मफलं
कार्यं कर्म करोति यः |
स सन्न्यासी च योगी च
न निरग्निर्न चाक्रियः ||

6.2 यं सन्न्यासमिति प्राहुः
योगं तं विद्धि पाण्डव |
न ह्यसन्न्यस्तसङ्कल्पः
योगी भवति कश्चन ||

6.3 आरुरुक्षोर्मुनेर्योगं
कर्म कारणमुच्यते |
योगारूढस्य तस्यैव
शमः कारणमुच्यते ||

6.4 यदा हि नेन्द्रियार्थेषु
न कर्मस्वनुषज्जते |
सर्वसङ्कल्पसन्न्यासी
योगारूढस्तदोच्यते ||

6.5 उद्धरेदात्मनाऽऽत्मानं
नात्मानमवसादयेत् |
आत्मैव ह्यात्मनो बन्धुः
आत्मैव रिपुरात्मनः ||

6.6 बन्धुरात्माऽऽत्मनस्तस्य
येनात्मैवात्मना जितः |
अनात्मनस्तु शत्रुत्वे
वर्तेतात्मैव शत्रुवत् ||

6.7 जितात्मनः प्रशान्तस्य
परमात्मा समाहितः |
शीतोष्णसुखदुःखेषु
तथा मानापमानयोः ||

6.8 ज्ञानविज्ञानतृप्तात्मा
कूटस्थो विजितेन्द्रियः |
युक्त इत्युच्यते योगी
समलोष्टाश्मकाञ्चनः ||

6.9 सुहृन्मित्रार्युदासीन
मध्यस्थद्वेष्यबन्धुषु |
साधुष्वपि च पापेषु
समबुद्धिर्विशिष्यते ||

6.10 योगी युञ्जीत सततम्
आत्मानं रहसि स्थितः |
एकाकी यतचित्तात्मा
निराशीरपरिग्रहः ||

6.11 शुचौ देशे प्रतिष्ठाप्य
स्थिरमासनमात्मनः |
नात्युच्छ्रितं नातिनीचं
चैलाजिनकुशोत्तरम् ||

6.12 तत्रैकाग्रं मनः कृत्वा
यतचित्तेन्द्रियक्रियः |
उपविश्यासने युञ्ज्यात्
योगमात्मविशुद्धये ||

6.13 समं कायशिरोग्रीवं
धारयन्नचलं स्थिरः |
सम्प्रेक्ष्य नासिकाग्रं स्वं
दिशश्चानवलोकयन् ||

6.14 प्रशान्तात्मा विगतभीः
ब्रह्मचारिव्रते स्थितः |
मनः संयम्य मच्चित्तः
युक्त आसीत मत्परः ||

6.15 युञ्जन्नेवं सदाऽऽत्मानं
योगी नियतमानसः |
शान्तिं निर्वाणपरमां
मत्संस्थामधिगच्छति ||

6.16 नात्यश्नतस्तु योगोऽस्ति
न चैकान्तमनश्नतः |
न चाति स्वप्नशीलस्य
जाग्रतो नैव चार्जुन ||

6.17 युक्ताहारविहारस्य
युक्तचेष्टस्य कर्मसु |
युक्तस्वप्नावबोधस्य
योगो भवति दुःखहा ||

6.18 यदा विनियतं चित्तम्
आत्मन्येवावतिष्ठते |
निस्स्पृहः सर्वकामेभ्यः
युक्त इत्युच्यते तदा ||

6.19 यथा दीपो निवातस्थः
नेङ्गते सोपमा स्मृता |
योगिनो यतचित्तस्य
युञ्जतो योगोमात्मनः ||

6.20 यत्रोपरमते चित्तं
निरुद्धं योगसेवया |
यत्र चैवात्मनाऽऽत्मानं
पस्यन्नात्मनि तुष्यति ||

6.21 सुखमात्यन्तिकं यत्तत्
बुद्धिग्राह्यमतीन्द्रियम् |
वेत्ति यत्र न चैवायं
स्थितश्चलति तत्त्वतः ||

6.22 यं लब्ध्वा चापरं लाभं
मन्यते नाधिकं ततः |
यस्मिन् स्थितो न दुःखेन
गुरुणापि विचाल्यते ||

6.23 तं विद्यात् दुःखसंयोग
वियोगं योगसञ्ज्ञितम् |
स निश्चयेन योक्तव्यः
योगोऽनिर्विण्णचेतसा ||

6.24 सङ्कल्पप्रभवान्कामान्
त्यक्त्वा सर्वानशेषतः |
मनसैवेन्द्रियग्रामं
विनियम्य समन्ततः ||

6.25 शनैः शनैरुपरमेत्
बुद्ध्या धृतिगृहीतया |
आत्मसंस्थं मनः कृत्वा
न किञ्चिदपि चिन्तयेत् ||

6.26 यतो यतो निश्चरति
मनश्चञ्चलमस्थिरम् |
ततस्ततो नियम्यैतत्
आत्मन्येव वशं नयेत् ||

6.27 प्रशान्तमनसं ह्येनं
योगिनं सुखमुत्तमम् |
उपैति शान्तरजसं
ब्रह्मभूतमकल्मषम् ||

6.28 युञ्जन्नेवं सदाऽऽत्मानं
योगी विगतकल्मषः |
सुखेन ब्रह्मसंस्पर्शं
अत्यन्तं सुखमश्नुते ||

**6.29** सर्वभूतस्थमात्मानं
सर्वभूतानि चात्मनि |
ईक्षते योगयुक्तात्मा
सर्वत्र समदर्शनः ||

**6.30** यो मां पश्यति सर्वत्र
सर्वं च मयि पश्यति |
तस्याहं न प्रणश्यामि
स च मे न प्रणश्यति ||

**6.31** सर्वभूतस्थितं यो मां
भजत्येकत्वमास्थितः |
सर्वथा वर्तमानोऽपि
स योगी मयि वर्तते ||

**6.32** आत्मौपम्येन सर्वत्र
समं पश्यति योऽर्जुन |
सुखं वा यदि वा दुःखं
स योगी परमो मतः ||

**6.33** अर्जुन उवाच
योऽयं योगस्त्वया प्रोक्तः
साम्येन मधुसूदन |
एतस्याहं न पश्यामि
चञ्चलत्वात् स्थितिं स्थिराम् ||

**6.34** चञ्चलं हि मनः कृष्ण
प्रमाथि बलवद्दृढम् |
तस्याहं निग्रहं मन्ये
वायोरिव सुदुष्करम् ||

**6.35** श्री भगवानुवाच
असंशयं महाबाहो
मनो दुर्निग्रहं चलम् |
अभ्यासेन तु कौन्तेय
वैराग्येण च गृह्यते ||

**6.36** असंयतात्मना योगः
दुष्प्राप इति मे मतिः |
वश्यात्मना तु यतता
शक्योऽवाप्तुमुपायतः ||

**6.37** अर्जुन उवाच
अयतिः श्रद्धयोपेतः
योगाच्चलितमानसः |
अप्राप्य योगसंसिद्धिं
कां गतिं कृष्ण गच्छति ||

**6.38** कच्चिन्नोभयविभ्रष्टः
छिन्नाभ्रमिव नश्यति |
अप्रतिष्ठो महाबाहो
विमूढो ब्रह्मणः पथि ||

**6.39** एतन्मे संशयं कृष्ण
छेत्तुमर्हस्यशेषतः |
त्वदन्यः संशयस्यास्य
छेत्ता न ह्युपपद्यते ||

**6.40** श्री भगवानुवाच
पार्थ नैवेह नामुत्र
विनाशस्तस्य विद्यते |
न हि कल्याणकृत्कश्चित्
दुर्गतिं तात गच्छति ||

**6.41** प्राप्य पुण्यकृतां लोकाण्
उषित्वा शाश्वतीः समाः |
शुचीनां श्रीमतां गेहे
योगभ्रष्टोऽभिजायते ||

**6.42** अथवा योगिनामेव
कुले भवति धीमताम् |
एतद्धि दुर्लभतरं
लोके जन्म यदीदृशम् ||

**6.43** तत्र तं बुद्धिसंयोगं
लभते पौर्वदेहिकम् |
यतते च ततो भूयः
संसिद्धौ कुरुनन्दन ||

**6.44** पुर्वाभ्यासेन तेनैव
ह्रियते ह्यवशोऽपि सः |
जिज्ञासुरपि योगस्य
शब्दब्रह्मातिवर्तते ||

**6.45** प्रयत्नाद्यतमानस्तु
योगी संशुद्धकिल्बिषः |
अनेकजन्मसंसिद्धः
ततो याति परां गतिम् ||

**6.46** तपस्विभ्योऽधिको योगी
ज्ञानिभ्योऽपि मतोऽधिकः |
कर्मिभ्यश्चाधिको योगी
तस्माद्योगी भवार्जुन ||

**6.47** योगिनामपि सर्वेषां
मद्गतेनान्तरात्मना |
श्रद्धावान्भजते यो मां
स मे युक्ततमो मतः ||

# 7 Jñāna-Vijñāna Yoga

7.0 ओं श्री परमात्मने नमः
अथ सप्तमोऽध्यायः
ज्ञानविज्ञानयोगः

7.1 श्री भगवानुवाच
मय्यासक्तमनाः पार्थ
योगं युञ्जन्मदाश्रयः |
असंशयं समग्रं मां
यथा ज्ञास्यसि तच्छृणु ||

7.2 ज्ञानं तेऽहं सविज्ञानम्
इदं वक्ष्याम्यशेषतः |
यज्ज्ञात्वा नेह भूयोऽन्यत्
ज्ञातव्यमवशिष्यते ||

7.3 मनुष्याणां सहस्रेषु
कश्चिद्यतति सिद्धये |
यततामपि सिद्धानां
कस्चिन्मां वेत्ति तत्त्वतह् ||

7.4 भूमिरापोऽनलो वायुः
खं मनो बुद्धिरेव च |
अहङ्कार इतीयं मे
भिन्ना प्रकृतिरष्टधा ||

7.5 अपरेयमितस्त्वन्यां
प्रकृतिं विद्धि मे पराम् |
जीवभूतां महाबाहो
ययेदं धार्यते जगत् ||

7.6 एतद्योनीनि भूतानि
सर्वाणीत्युपधारय |
अहं कृत्स्नस्य जगतः
प्रभवः प्रलयस्तथा ||

7.7 मत्तः परतरं नान्यत्
किञ्चिदस्ति धनञ्जय |
मयि सर्वमिदं प्रोतं
सूत्रे मणिगणा इव ||

7.8 रसोऽहमप्सु कौन्तेय
प्रभाऽस्मि शशिसूर्ययोः |
प्रणवः सर्ववेदेषु
शब्दः खे पौरुषं नृषु ||

7.9 पुण्यो गन्धः पृथिव्यां च
तेजश्चास्मि विभावसौ |
जीवनं सर्वभुतेषु
तपश्चास्मि तपस्विषु ||

7.10 बीजं मां सर्वभूतानां
विद्धि पार्थ सनातनम् |
बुद्धिर्बुद्धिमतामस्मि
तेजस्तेजस्विनामहम् ||

7.11 बलं बलवतां चाहं
कामरागविवर्जितम् |
धर्माविरुद्धो भूतेषु
कामोऽस्मि भरतर्षभ ||

7.12 ये चैव सात्त्विका भावाः
राजसास्तामसाश्च ये |
मत्त एवेति तान्विद्धि
न त्वहं तेषु ते मयि ||

7.13 त्रिभिर्गुणमयैर्भावैः
एभिः सर्वमिदं जगत् |
मोहितं नाभिजानाति
मामेभ्यः परमव्ययम् ||

7.14 दैवी ह्येषा गुनामयी
मम माय दुरत्यया |
मामेव ये प्रपद्यन्ते
मायामेतां तरन्ति ते ||

7.15 न मां दुष्कृतिनो मूढाः
प्रपद्यन्ते नराधमाः |
माययाऽपहृतज्ञानाः
आसुरं भावमाश्रिताः ||

7.16 चतुर्विधा भजन्ते मां
जनाः सुकृतिनोऽर्जुन |
आर्तो जिज्ञासुरर्थार्थी
ज्ञानी च भरतर्षभ ||

7.17 तेषां ज्ञानी नित्ययुक्तः
एकभक्तिर्विशिष्यते |
प्रियो हि ज्ञानिनोऽत्यर्थम्
अहं स च मम प्रियः ||

7.18 उदाराः सर्व एवैते
ज्ञानी त्वात्मैव मे मतम् |
आस्थितः स हि युक्तात्मा
मामेवानुत्तमां गतिम् ||

7.19 बहूनां जन्मनामन्ते
ज्ञानवान्मां प्रपद्यते |
वासुदेवः सर्वमिति
स महात्मा सुदुर्लभः ||

7.20 कामैस्तैस्तैर्हृतज्ञानाः
प्रपद्यन्तेऽन्यदेवताः |
तं तं नियममास्थाय
प्रकृत्या नियताः स्वया ||

7.21 यो यो यां यां तनुं भक्तः
श्रद्धयार्चितुमिच्छति |
तस्य तस्याचलां श्रद्धां
तामेव विदधाम्यहम् ||

7.22 स तया श्रद्धया युक्तः
तस्याराधनमीहते |
लभते च ततः कामान्
मयैव विहितान्हि तान् ||

7.23 अन्तवत्तु फलं तेषां
तद्भवत्यल्पमेधसां |
देवान्देवयजो यान्ति
मद्भक्ता यान्ति मामपि ||

7.24 अव्यक्तं व्यक्तिमापन्नं
मन्यन्ते मामबुद्धयः |
परं भावमजानन्तः
ममाव्ययमनुत्तमन् ||

7.25 नाहं प्रकाशः सर्वस्य
योगमायासमावृतः |
मूढोऽयं नाभिजानाति
लोको मामजमव्ययम् ||

7.26 वेदाहं समतीतानि
वर्तमानानि चार्जुन |
भविष्याणि च भूतानि
मां तु वेद न कश्चन ||

7.27 इच्छाद्वेषसमुत्थेन
द्वन्द्वमोहेन भारत |
सर्वभूतानि सम्मोहं
सर्गे यान्ति परन्तप ||

7.28 येषां त्वन्तगतं पापम्
जनानां पुण्यकर्मणाम् |
ते द्वन्द्वमोहनिर्मुक्ताः
भजन्ते मां दृढव्रताः ||

**7.29** जरामरणमोक्षाय
मामाश्रित्य यतन्ति ये |
ते ब्रह्म तद्विदुः कृत्स्नम्
अध्यात्मं कर्म चाखिलम् ||

**7.30** साधिभूताधिदैवं मां
साधियज्ञं च ये विदुः |
प्रयाणकालेऽपि च मां
ते विदुर्युक्तचेतसः ||

# 8 Akṣara-Parabrahma Yoga

8.0 ओं श्री परमात्मने नमः
अथ अष्टमोऽध्यायः
अक्षरपरब्रह्मयोगः

8.1 अर्जुन उवाच
किं तद्ब्रह्म किमध्यात्मं
किं कर्म पुरुषोत्तम |
अधिभूतं च किं प्रोक्तम्
अधिदैवं किमुच्यते ||

8.2 अधियज्ञः कथं कोऽत्र
देहेऽस्मिन्मधुसूदन |
प्रयाणकाले च कथं
ज्ञेयोऽसि नियतात्मभिः ||

8.3 श्री भगवानुवाच
अक्षरम् ब्रह्म परमं
स्वभावोऽध्यात्ममुच्यते |
भूतभावोद्भवकरः
विसर्गः कर्मसञ्ज्ञितः ||

8.4 अधिभूतं क्षरो भावः
पुरुषश्चाधिदैवतम् |
अधियज्ञोऽहमेवात्र
देहे देहभृतां वर ||

8.5 अन्तकाले च मामेव
स्मरन्मुक्त्वा कलेवरम् |
यः प्रयाति स मद्भावं
याति नास्त्यत्र संशयः ||

8.6 यं यं वापि स्मरन्भावं
त्यजत्यन्ते कलेवरम् |
तं तमेवैति कौन्तेय
सदा तद्भावभावितः ||

8.7 तस्मात्सर्वेषु कालेषु
मामनुस्मर युध्य च |
मय्यर्पितमनोबुद्धिः
मामेवैष्यस्यसंशयम् ||

8.8 अभ्यासयोगयुक्तेन
चेतसा नान्यगामिना |
परमं पुरुषं दिव्यं
याति पार्थानुचिन्तयन् ||

8.9 कविं पुराणमनुशासितारम्
अणोरणीयांसमनुस्मरेद्यः |
सर्वस्य धातारमचिन्त्यरूपम्
आदित्यवर्णं तमसः परस्तात् ||

8.10 प्रयाणकाले मनसाऽचलेन
भक्त्या युक्तो योगबलेन चैव |
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यं ||

8.11 यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः |
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ||

8.12 सर्वद्वाराणि संयम्य
मनो हृदि निरुध्य च |
मूर्ध्न्याधायात्मनः प्राणम्
आस्थितो योगधारणां ||

8.13 ओमित्येकाक्षरं ब्रह्म
व्याहरन्मामनुस्मरन् |
यः प्रयाति त्यजन्देहं
स याति परमां गतिम् ||

8.14 अनन्यचेताः सततं
यो मां स्मरति नित्यशः |
तस्याहं सुलभः पार्थ
नित्ययुक्तस्य योगिनः ||

8.15 मामुपेत्य पुनर्जन्म
दुःखालयमशाश्वतम् |
नाप्नुवन्ति महात्मानः
संसिद्धिं परमां गताः ||

8.16 आब्रह्मभुवनाल्लोकाः
पुनरावर्तिनोऽर्जुन |
मामुपेत्य तु कौन्तेय
पुनर्जन्म न विद्यते ||

8.17 सहस्रयुगपर्यन्तम्
अहर्यद्ब्रह्मणो विदुः |
रात्रिं युगसहस्रान्तां
तेऽहोरात्रविदो जनाः ||

8.18 अव्यक्ताद्व्यक्तयः सर्वाः
प्रभवन्त्यहरागमे |
रात्र्यागमे प्रलीयन्ते
तत्रैवाव्यक्तसञ्ज्ञके ||

8.19 भूतग्रामः स एवायं
भूत्वा भूत्वा प्रलीयते |
रात्र्यागमेऽवशः पार्थ
प्रभवत्यहरागमे ||

8.20 परस्तस्मात्तु भावोऽन्यः
अव्यक्तोऽव्यक्तात्सनातनः |
यः स सर्वेषु भूतेषु
नश्यत्सु न विनश्यति ||

8.21 अव्यक्तोऽक्षर इत्युक्तः
तमाहुः परमां गतिम् |
यं प्राप्य न निवर्तन्ते
तद्धाम परमं मम ||

8.22 पुरुषः स परः पार्थ
भक्त्या लभ्यस्त्वनन्यया |
यस्यान्तः स्थानि भूतानि
येन सर्वमिदं ततम् ||

8.23 यत्र काले त्वनावृतिम्
आवृतिं चैव योगिनः |
प्रयाता यान्ति तं कालं
वक्ष्यामि भरतर्षभ ||

8.24 अग्निर्ज्योतिरहः शुक्लः
षण्मासा उत्तरायणम् |
तत्र प्रयाता गच्छन्ति
ब्रह्म ब्रह्मविदो जनाः ||

8.25 धूमो रात्रिस्तथा कृष्णः
षण्मासा दक्षिणायनम् |
तत्र चान्द्रमसं ज्योतिः
योगी प्राप्य निवर्तते ||

8.26 शुक्लकृष्णे गती ह्येते
जगतः शाश्वते मते |
एकया यात्यनावृतिम्
अन्ययाऽऽवर्तते पुनः ||

8.27 नैते सृती पार्थ जानन्
योगी मुह्यति कश्चन |
तस्मात्सर्वेषु कालेषु
योगयुक्तो भवार्जुन ||

8.28 वेदेषु यज्ञेषु तपस्सु चैव
दानेषु यत् पुण्यफलं प्रदिष्टम् |
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ||

# 9 Rājavidyā-Rājaguhya Yoga

9.0 ओं श्री परमात्मने नमः
अथ नवमोऽध्यायः
राजविद्याराजगुह्ययोगः

9.1 श्री भगवानुवाच
इदं तु ते गुह्यतमम्
प्रवक्ष्याम्यनसूयवे |
ज्ञानं विज्ञानसहितं
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ||

9.2 राजविद्या राजगुह्यं
पवित्रमिदमुत्तमम् |
प्रत्यक्षावगमं धर्म्यं
सुसुखं कर्तुमव्ययम् ||

9.3 अश्रद्दधानाः पुरुषाः
धर्मस्यास्य परन्तप |
अप्राप्य मां निवर्तन्ते
मृत्युसंसारवर्त्मनि ||

9.4 मया ततमिदं सर्वं
जगदव्यक्तमूर्तिना |
मत्स्थानि सर्वभूतानि
न चाहं तेष्ववस्थितः ||

9.5 न च मत्स्थानि भूतानि
पश्य मे योगमैश्वरम् |
भूतभृन्न च भूतस्थः
ममात्मा भूतभावनः ||

9.6 यथाऽऽकाशस्थितो नित्यं
वायुः सर्वत्रगो महान् |
तथा सर्वाणि भूतानि
मत्स्थानीत्युपधारय ||

9.7 सर्वभूतानि कौन्तेय
प्रकृतिं यानि मामिकाम् |
कल्पक्षये पुनस्तानि
कल्पादौ विसृजाम्यहम् ||

9.8 प्रकृतिं स्वामवष्टभ्य
विसृजामि पुनः पुनः |
भूतग्राममिमं कृत्स्नम्
अवशं प्रकृतेर्वशात् ||

9.9 न च मां तानि कर्माणि
निबध्नन्ति धनञ्जय |
उदासीनवदासीनम्
असक्तं तेषु कर्मसु ||

9.10 मयाध्यक्षेण प्रकृतिः
सूयते सचराचरम् |
हेतुनाऽनेन कौन्तेय
जगद्विपरिवर्तते ||

9.11 अवजानन्ति मां मूढाः
मानुषीं तनुमाश्रितम् |
परं भावमजानन्तः
मम भूतमहेश्वरम् ||

9.12 मोघाशा मोघकर्माणः
मोघज्ञाना विचेतसः |
राक्षसीमासुरीं चैव
प्रकृतिं मोहिनीं श्रिताः ||

**9.13** महात्मानस्तु मां पार्थ
दैवीं प्रकृतिमाश्रिताः |
भजन्त्यनन्यमनसः
ज्ञात्वा भूतादिमव्ययम् ||

**9.14** सततं कीर्तयन्तो मां
यतन्तश्च दृढव्रताः |
नमस्यन्तश्च माम् भक्त्या
नित्ययुक्ता उपासते ||

**9.15** ज्ञानयज्ञेन चाप्यन्ये
यजन्तो मामुपासते |
एकत्वेन पृथक्त्वेन
बहुधा विश्वतोमुखम् ||

**9.16** अहं क्रतुरहं यज्ञः
स्वधाहमहमौषधम् |
मन्त्रोऽहमहमेवाज्यम्
अहमग्निरहं हुतम् ||

**9.17** पिताऽहमस्य जगतः
माता धाता पितामहः |
वेद्यं पवित्रमोङ्कारः
ऋक्साम यजुरेव च ||

**9.18** गतिर्भर्ता प्रभुः साक्षी
निवासः शरणं सुहृत् |
प्रभवः प्रलयः स्थानं
निधानं बीजमव्ययम् ||

**9.19** तपाम्यहमहं वर्षं
निगृह्णाम्युत्सृजामि च |
अमृतं चैव मृत्युश्च
सदसच्चाहमर्जुन ||

**9.20** त्रैविद्या मां सोमपाः पूतपापाः
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते |
ते पुण्यमासाद्य सुरेन्द्रलोकम्
अश्नन्ति दिव्यान्दिवि देवभोगान् ||

**9.21** ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति |
एवं त्रयीधर्ममनुप्रपन्नाः
गतागतं कामकामा लभन्ते ||

**9.22** अनन्याश्चिन्तयन्तो मां
ये जनाः पर्युपासते |
तेषां नित्याभियुक्तानां
योगक्षेमं वहाम्यहम् ||

**9.23** येऽप्यन्यदेवता भक्ताः
यजन्ते श्रद्धयान्विताः |
तेऽपि मामेव कौन्तेय
यजन्त्यविधिपूर्वकम् ||

**9.24** अहं हि सर्वयज्ञानां
भोक्ता च प्रभुरेव च |
न तु मामभिजानन्ति
तत्त्वेनातश्च्यवन्ति ते ||

**9.25** यान्ति देवव्रता देवाण्
पितॄन् यान्ति पितृव्रताः |
भूतानि यान्ति भूतेज्याः
यान्ति मद्याजिनोऽपि माम् ||

**9.26** पत्रं पुष्पं फलं तोयं
यो मे भक्त्या प्रयच्छति |
तदहं भक्त्युपहृतं
अश्नामि प्रयतात्मनः ||

**9.27** यत्करोषि यदश्नासि
यज्जुहोषि ददासि यत् |
यत्तपस्यसि कौन्तेय
तत्कुरुष्व मदर्पणम् ||

**9.28** शुभाशुभफलैरेवं
मोक्ष्यसे कर्मबन्धनैः |
सन्न्यासयोगयुक्तात्मा
विमुक्तो मामुपैष्यसि ||

**9.29** समोऽहं सर्वभूतेषु
न मे द्वेष्योऽस्ति न प्रियः |
ये भजन्ति तु मां भक्त्या
मयि ते तेषु चाप्यहम् ||

**9.30** अपि चेत्सुदुराचारः
भजते मामनन्यभाक् |
साधुरेव स मन्तव्यः
सम्यग्व्यवसितो हि सः ||

**9.31** क्षिप्रम् भवति धर्मात्मा
शश्वच्छान्तिं निगच्छति |
कौन्तेय प्रतिजानीहि
न मे भक्तः प्रणश्यति ||

**9.32** माम् हि पार्थ व्यपाश्रित्य
येऽपि स्युः पापयोनयः |
स्त्रियो वैश्यास्तथा शूद्राः
तेऽपि यान्ति परां गतिम् ||

**9.33** किं पुनर्ब्राह्मणाः पुण्याः
भक्ता राजर्षयस्तथा |
अनित्यमसुखं लोकम्
इमं प्राप्य भजस्व माम् ||

**9.34** मन्मना भव मद्भक्तः
मद्याजी मां नमस्कुरु |
मामेवैष्यसि युक्त्वैवम्
आत्मानं मत्परायणः ||

# 10 Vibhūti Yoga

10.0 ओं श्री परमात्मने नमः
अथ दशमोऽध्यायः
विभुतियोगः

10.1 श्री भगवानुवाच
भूय एव महाबाहो
शृणु मे परमं वचः |
यत्तेऽहं प्रीयमाणाय
वक्ष्यामि हितकाम्यया ||

10.2 न मे विदुः सुरगणाः
प्रभवं न महर्षयः |
अहमादिर्हि देवानां
महर्षीणां च सर्वशः ||

10.3 यो मामजमनादिं च
वेत्ति लोकमहेश्वरम् |
असम्मूढः स मर्त्येषु
सर्वपापैः प्रमुच्यते ||

10.4 बुद्धिर्ज्ञानमसम्मोहः
क्षमा सत्यं दमः शमः |
सुखं दुःखं भवोऽभावः
भयं चाभयमेव च ||

10.5 अहिंसा समता तुष्टिः
तपो दानं यशोऽयशः |
भवन्ति भावा भूतानां
मत्त एव पृथग्विधाः ||

10.6 महर्षयः सप्त पूर्वे
चत्वारो मनवस्तथा |
मद्भावा मानसा जाताः
येषां लोक इमाः प्रजाः ||

10.7 एतां विभूतिं योगं च
मम यो वेत्ति तत्त्वतः |
सोऽविकम्पेन योगेन
युज्यते नात्र संशयः ||

10.8 अहं सर्वस्य प्रभवः
मत्तः सर्वं प्रवर्तते |
इति मत्वा भजन्ते मां
बुधा भावसमन्विताः ||

10.9 मच्चित्ता मद्गतप्राणाः
बोधयन्तः परस्परम् |
कथयन्तश्च मां नित्यं
तुष्यन्ति च रमन्ति च ||

10.10 तेषां सततयुक्तानां
भजतां प्रीतिपूर्वकम् |
ददामि बुद्धियोगं तं
येन मामुपयान्ति ते ||

10.11 तेषामेवानुकम्पार्थम्
अहमज्ञानजं तमः |
नाशयाम्यात्मभावस्थः
ज्ञानदीपेन भास्वता ||

10.12 अर्जुन उवाच
परं ब्रह्म परं धाम
पवित्रं परमं भवान् |
पुरुषं शाश्वतं दिव्यम्
आदिदेवमजं विभुम् ||

**10.13** आहुस्त्वामृषयः सर्वे
देवर्षिर्नारदस्तथा |
असितो देवलो व्यासः
स्वयं चैव ब्रवीषि मे ||

**10.14** सर्वमेतदृतं मन्ये
यन्मां वदसि केशव |
न हि ते भगवन्व्यक्तिं
विदुर्देवा न दानवाः ||

**10.15** स्वयमेवात्मनाऽऽत्मानं
वेत्थ त्वं पुरुषोत्तम |
भूतभावन भूतेश
देवदेव जगत्पते ||

**10.16** वक्तुमर्हस्यशेषेण
दिव्या ह्यात्मविभूतयः |
याभिर्विभूतिभिर्लोकान्
इमांस्त्वं व्याप्य तिष्ठसि ||

**10.17** कथं विद्यामहं योगिन्
त्वां सदा परिचिन्तयन् |
केषु केषु च भावेषु
चिन्त्योऽसि भगवन्मया ||

**10.18** विस्तरेणात्मनो योगं
विभूतिं च जनार्दन |
भूयः कथय तृप्तिर्हि
श‍ृण्वतो नास्ति मेऽमृतम् ||

**10.19** श्री भगवानुवाच
हन्त ते कथयिष्यामि
दिव्या ह्यात्मविभूतयः |
प्राधान्यतः कुरुश्रेष्ठ
नास्त्यन्तो विस्तरस्य मे ||

**10.20** अहमात्मा गुडाकेश
सर्वभूताशयस्थितः |
अहमादिश्च मध्यं च
भूतानामन्त एव च ||

**10.21** आदित्यानामहम् विष्णुः
ज्योतिषां रविरंशुमान् |
मरीचिर्मरुतामस्मि
नक्षत्राणामहं शशी ||

**10.22** वेदानां सामवेदोऽस्मि
देवानामस्मि वासवः |
इन्द्रियाणां मनश्चास्मि
भूतानामस्मि चेतना ||

**10.23** रुद्राणां शङ्करश्चास्मि
वित्तेशो यक्षरक्षसाम् |
वसूनां पावकश्चास्मि
मेरुः शिखरिणामहम् ||

**10.24** पुरोधसां च मुख्यं मां
विद्धि पार्थ बृहस्पतिम् |
सेनानीनामहं स्कन्दः
सरसामस्मि सागरः ||

**10.25** महर्षीणां भृगुरहं
गिरामस्म्येकमक्षरम् |
यज्ञानां जपयज्ञोऽस्मि
स्थावराणां हिमालयः ||

**10.26** अश्वत्थः सर्ववृक्षाणां
देवर्षीणां च नारदः |
गन्धर्वाणां चित्ररथः
सिद्धानां कपिलो मुनिः ||

**10.27** उच्चैः श्रवसमश्वानां
विद्धि माममृतोद्भवम् |
ऐरावतं गजेन्द्राणां
नराणां च नराधिपम् ||

**10.28** आयुधानामहं वज्रं
धेनूनामस्मि कामधुक् |
प्रजनश्चास्मि कन्दर्पः
सर्पाणामस्मि वासुकिः ||

**10.29** अनन्तश्चास्मि नागानां
वरुणो यादसामहम् |
पितॄणामर्यमा चास्मि
यमः संयमतामहम् ||

**10.30** प्रह्लादश्चास्मि दैत्यानां
कालः कलयतामहम् |
मृगाणां च मृगेन्द्रोऽहं
वैनतेयश्च पक्षिणाम् ||

**10.31** पवनः पवतामस्मि
रामः शस्त्रभृतामहम् |
झषाणां मकरश्चास्मि
स्रोतसामस्मि जाह्नवी ||

**10.32** सर्गाणामादिरन्तश्च
मध्यं चैवाहमर्जुन |
अध्यात्मविद्या विद्यानां
वादः प्रवदतामहम् ||

**10.33** अक्षराणामकारोऽस्मि
द्वन्द्वः सामासिकस्य च |
अहमेवाक्षयः कालः
धाताऽहं विश्वतोमुखः ||

**10.34** मृत्युः सर्वहरश्चाहम्
उद्भवश्च भविष्यताम् |
कीर्तिः श्रीर्वाक्च नारीणां
स्मृतिर्मेधा धृतिः क्षमा ||

**10.35** बृहत्साम तथा साम्नां
गायत्री छन्दसामहम् |
मासानां मार्गशीर्षोऽहम्
ऋतूनां कुसुमाकरः ||

**10.36** द्यूतं छलयतामस्मि
तेजस्तेजस्विनामहम् |
जयोऽस्मि व्यवसायोऽस्मि
सत्त्वं सत्त्ववतामहम् ||

**10.37** वृष्णीनां वासुदेवोऽस्मि
पाण्डवानां धनञ्जयः |
मुनीनामप्यहं व्यासः
कवीनामुशना कविः ||

**10.38** दण्डो दमयतामस्मि
नीतिरस्मि जिगीषताम् |
मौनं चैवास्मि गुह्यानां
ज्ञानं ज्ञानवतामहम् ||

**10.39** यच्चापि सर्वभूतानां
बीजं तदहमर्जुन |
न तदस्ति विना यत्स्यात्
मया भूतं चराचरम् ||

**10.40** नान्तोऽस्ति मम दिव्यानां
विभूतीनां परन्तप |
एष तूद्देशतः प्रोक्तः
विभूतेर्विस्तरो मया ||

**10.41** यद्यद्विभूतिमत्सत्त्वं
श्रीमदूर्जितमेव वा |
तत्तदेवावगच्छ त्वं
मम तेजोऽम्शसम्भवम् ||

**10.42** अथवा बहुनैतेन
किं ज्ञातेन तवार्जुन |
विष्टभ्याहमिदं कृत्स्नम्
एकांशेन स्थितो जगत् ||

# 11 Viśvarūpa Sandarśana Yoga

11.0 ओं श्री परमात्मने नमः
अथ एकादशोऽध्यायः
विश्वरूप सन्दर्शन योगः

11.1 अर्जुन उवाच
मदनुग्रहाय परमं
गुह्यमध्यात्मसञ्ज्ञितम् |
यत्त्वयोक्तं वचस्तेन
मोहोऽयं विगतो मम ||

11.2 भवाप्ययौ हि भूतानां
श्रुतौ विस्तरशो मया |
त्वत्तः कमलपत्राक्ष
माहात्म्यमपि चाव्ययम् ||

11.3 एवमेतद्यथाऽऽत्थ त्वम्
आत्मानं परमेश्वर |
द्रष्टुमिच्छामि ते रूपम्
ऐश्वरम् पुरुषोत्तम ||

11.4 मन्यसे यदि तच्छक्यं
मया द्रष्टुमिति प्रभो |
योगेश्वर ततो मे त्वं
दर्शयात्मानमव्ययम् ||

11.5 श्री भगवानुवाच
पश्य मे पार्थ रूपाणि
शतशोऽथ सहस्रशः |
नानाविधानि दिव्यानि
नानावर्णाकृतीनि च ||

11.6 पश्यादित्यान्वसून्रुद्रान्
अश्विनौ मरुतस्तथा |
बहून्यदृष्टपूर्वाणि
पश्याश्चर्याणि भारत ||

11.7 इहैकस्थं जगत्कृत्स्नं
पश्याद्य सचराचरम् |
मम देहे गुडाकेश
यच्चान्यत् द्रष्टुमिच्छसि ||

11.8 न तु मां शक्यसे द्रष्टुम्
अनेनैव स्वचक्षुषा |
दिव्यं ददामि ते चक्षुः
पश्य मे योगमैश्वरम् ||

11.9 सञ्जय उवाच
एवमुक्त्वा ततो राजन्
महायोगेश्वरो हरिः |
दर्शयामास पार्थाय
परमं रूपमैश्वरम् ||

11.10 अनेकवक्त्रनयनम्
अनेकाद्भुतदर्शनम् |
अनेकदिव्याभरणं
दिव्यानेकोद्यतायुधम् ||

11.11 दिव्यमाल्याम्बरधरं
दिव्यगन्धानुलेपनम् |
सर्वाश्चर्यमयं देवम्
अनन्तं विश्वतोमुखम् ||

**11.12** दिवि सूर्यसहस्रस्य
भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्यात्
भासस्तस्य महात्मनः ॥

**11.13** तत्रैकस्थं जगत्कृत्स्नं
प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य
शरीरे पाण्डवस्तदा ॥

**11.14** ततः स विस्मयाविष्टः
हृष्टरोमा धनञ्जयः ।
प्रणम्य शिरसा देवं
कृताञ्जलिरभाषत ॥

**11.15** अर्जुन उवाच
पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थम्
ऋषींश्च सर्वानुरगांश्च दिव्यान् ॥

**11.16** अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वा सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ॥

**11.17** किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्तात्
दीप्तानलार्कद्युतिमप्रमेयम् ॥

**11.18** त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥

**11.19** अनादिमध्यान्तमनन्तवीर्यम्
अनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥

**11.20** द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमिदं तवोग्रं
लोकत्रयं प्रव्यथितं महात्मन् ॥

**11.21** अमी हि त्वा सुरसङ्घा विशन्ति
केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥

**11.22** रुद्रादित्या वसवो ये च साध्याः
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसङ्घाः
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥

**11.23** रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाऽहम् ॥

**11.24** नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥

**11.25** दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसन्निभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥

**11.26** अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसङ्घैः ।
भीष्मो द्रोणः सूतपुत्रस्तथाऽसौ
सहास्मदीयैरपि योधमुख्यैः ॥

**11.27** वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि |
केचिद्विलग्ना दशनान्तरेषु
सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ||

**11.28** यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति |
तथा तवामी नरलोकवीराः
विशन्ति वक्त्राण्यभिविज्वलन्ति ||

**11.29** यथा प्रदीप्तं ज्वलनं पतङ्गाः
विशन्ति नाशाय समृद्धवेगाः |
तथैव नाशाय विशन्ति लोकाः
तवापि वक्त्राणि समृद्धवेगाः ||

**11.30** लेलिह्यसे ग्रसमानः समन्तात्
लोकान्समग्रान्वदनैर्ज्वलद्भिः |
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ||

**11.31** आख्याहि मे को भवानुग्ररूपः
नमोऽस्तु ते देववर प्रसीद |
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ||

**11.32** श्री भगवानुवाच
कालोऽस्मि लोकक्षयकृत्प्रवृद्धः
लोकान्समाहर्तुमिह प्रवृत्तः |
ऋतेऽपि त्वा न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ||

**11.33** तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् |
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ||

**11.34** द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान् |
मया हतांस्त्वं जहि मा व्यथिष्ठाः
युध्यस्व जेतासि रणे सपत्नान् ||

**11.35** सञ्जय उवाच
एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी |
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ||

**11.36** अर्जुन उवाच
स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च |
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ||

**11.37** कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे |
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ||

**11.38** त्वमादिदेवः पुरुषः पुराणः
त्वमस्य विश्वस्य परं निधानम् |
वेत्ताऽसि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ||

**11.39** वायुर्यमोऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च |
नमो नमस्तेऽस्तु सहस्रकृत्वः
पुनश्च भूयोऽपि नमो नमस्ते ||

**11.40** नमः पुरस्तादथ पृष्ठतस्ते
नमोऽस्तु ते सर्वत एव सर्व |
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततोऽसि सर्वः ||

**11.41** सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति |
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वाऽपि ||

11.42 यच्चापहासार्थमसत्कृतोऽसि
विहारशय्यासनभोजनेषु |
एकोऽथवाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ||

11.43 पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् |
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः
लोकत्रयेऽप्यप्रतिमप्रभाव ||

11.44 तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् |
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ||

11.45 अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे |
तदेव मे दर्शय देवरूपं
प्रसीद देवेश जगन्निवास ||

11.46 किरीटिनं गदिनं चक्रहस्तम्
इच्छामि त्वां द्रष्टुमहं तथैव |
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ||

11.47 श्री भगवानुवाच
मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् |
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ||

11.48 न वेदयज्ञाध्ययनैर्न दानैः
न च क्रियाभिर्न तपोभिरुग्रैः |
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ||

11.49 मा ते व्यथा मा च विमूढभावः
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् |
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ||

11.50 सञ्जय उवाच
इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः |
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ||

11.51 अर्जुन उवाच
दृष्ट्वेदं मानुषं रूपं
तव सौम्यं जनार्दन |
इदानीमस्मि संवृत्तः
सचेताः प्रकृतिं गतः ||

11.52 श्री भगवानुवाच
सुदुर्दर्शमिदं रूपं
दृष्टवानसि यन्मम |
देवा अप्यस्य रूपस्य
नित्यं दर्शनकाङ्क्षिणः ||

11.53 नाहं वेदैर्न तपसा
न दानेन न चेज्यया |
शक्य एवंविधो द्रष्टुं
दृष्टवानसि मां यथा ||

11.54 भक्त्या त्वनन्यया शक्यः
अहमेवंविधोऽर्जुन |
ज्ञातुं द्रष्टुं च तत्त्वेन
प्रवेष्टुं च परन्तप ||

11.55 मत्कर्मकृन्मत्परमः
मद्भक्तः सङ्गवर्जितः |
निर्वैरः सर्वभूतेषु
यः स मामेति पाण्डव ||

# 12 Bhakti Yoga

12.0 ओं श्री परमात्मने नमः
अथ द्वादशोऽध्यायः
भक्तियोगः

12.1 अर्जुन उवाच
एवं सततयुक्ता ये
भक्तास्त्वां पर्युपासते |
ये चाप्यक्षरमव्यक्तं
तेषां के योगवित्तमाः ||

12.2 श्री भगवान् उवाच
मय्यावेश्य मनो ये मां
नित्ययुक्ता उपासते |
श्रद्धया परयोपेताः
ते मे युक्ततमा मताः ||

12.3 ये त्वक्षरमनिर्देश्यम्
अव्यक्तं पर्युपासते |
सर्वत्रगमचिन्त्यम् च
कूटस्थमचलम् ध्रुवं ||

12.4 सन्नियम्येन्द्रियग्रामं
सर्वत्र समबुद्धयः |
ते प्राप्नुवन्ति मामेव
सर्वभूतहिते रताः ||

12.5 क्लेशोऽधिकतरस्तेषाम्
अव्यक्तासक्तचेतसाम् |
अव्यक्ता हि गतिर्दुःखं
देहवद्भिरवाप्यते ||

12.6 ये तु सर्वाणि कर्माणि
मयि सन्न्यस्य मत्पराः |
अनन्येनैव योगेन
मां ध्यायन्त उपासते ||

12.7 तेषामहं समुद्धर्ता
मृत्युसंसारसागरात् |
भवामि नचिरात्पार्थ
मय्यावेशितचेतसाम् ||

12.8 मय्येव मन आधत्स्व
मयि बुद्धिं निवेशय |
निवसिष्यसि मय्येव
अत ऊर्ध्वं न सम्शयः ||

12.9 अथ चित्तं समाधातुं
न शक्नोषि मयि स्थिरम् |
अभ्यासयोगेन ततः
मामिच्छाप्तुं धनञ्जय ||

12.10 अभ्यासेऽप्यसमर्थोऽसि
मत्कर्मपरमो भव |
मदर्थमपि कर्माणि
कुर्वन्सिद्धिमवाप्स्यसि ||

12.11 अथैतदप्यशक्तोऽसि
कर्तुं मद्योगमाश्रितः |
सर्वकर्मफलत्यागं
ततः कुरु यतात्मवान् ||

12.12 श्रेयो हि ज्ञानमभ्यासात्
ज्ञानाद्ध्यानं विशिष्यते |
ध्यानात्कर्मफलत्यागः
त्यागाच्छान्तिरनन्तरम् ||

**12.13** अद्वेष्टा सर्वभूतानां
मैत्रः करुण एव च |
निर्ममो निरहन्कारः
समदुःखसुखः क्षमी ||

**12.14** सन्तुष्टः सततं योगी
यतात्मा दृढनिश्चयः |
मय्यर्पितमनोबुद्धिः
यो मद्भक्तः स मे प्रियः ||

**12.15** यस्मान्नोद्विजते लोकः
लोकान्नोद्विजते च यः |
हर्षामर्षभयोद्वेगैः
मुक्तो यः स च मे प्रियः ||

**12.16** अनपेक्षः शुचिर्दक्षः
उदासीनो गतव्यथः |
सर्वारम्भपरित्यागी
यो मद्भक्तः स मे प्रियः ||

**12.17** यो न हृष्यति न द्वेष्टि
न शोचति न काञ्क्षति |
शुभाशुभपरित्यागी
भक्तिमान्यः स मे प्रियः ||

**12.18** समः शत्रौ च मित्रे च
तथा मानापमानयोः |
शीतोष्णसुखदुःखेषु
समः सञ्गविवर्जितः ||

**12.19** तुल्यनिन्दास्तुतिर्मौनी
सन्तुष्टो येन केनचित् |
अनिकेतः स्थिरमतिः
भक्तिमान्मे प्रियो नरः ||

**12.20** ये तु धर्म्यामृतमिदं
यथोक्तं पर्युपासते |
श्रद्धाना मत्परमाः
भक्तास्तेऽतीव मे प्रियाः ||

# 13 Kṣetrakṣetrajñavibhāga Yoga

13.0 ओं श्री परमात्मने नमः
अथ त्रयोदशोऽध्यायः
क्षेत्रक्षेत्रज्ञविभागयोगः

13.1 अर्जुन उवाच
प्रकृतिं पुरुषं चैव
क्षेत्रं क्षेत्रज्ञमेव च |
एतत् वेदितुमिच्छामि
ज्ञानं ज्ञेयं च केशव ||

13.2 श्री भगवानुवाच
इदं शरीरं कौन्तेय
क्षेत्रमित्यभिधीयते |
एतद्यो वेत्ति तं प्राहुः
क्षेत्रज्ञ इति तद्विदः ||

13.3 क्षेत्रज्ञं चापि मां विद्धि
सर्वक्षेत्रेषु भारत |
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं
यत्तज्ज्ञानं मतं मम ||

13.4 तत्क्षेत्रं यच्च यादृक्च
यद्विकारि यतश्च यत् |
स च यो यत्प्रभावश्च
तत्समासेन मे शृणु ||

13.5 ऋषिभिर्बहुधा गीतं
छन्दोभिर्विविधैः पृथक् |
ब्रह्मसूत्रपदैश्चैव
हेतुमद्भिर्विनिश्चितैः ||

13.6 महाभूतान्यहङ्कारः
बुद्धिरव्यक्तमेव च |
इन्द्रियाणि दशैकं च
पञ्च चेन्द्रियगोचराः ||

13.7 इच्छा द्वेषः सुखं दुःखं
सङ्घातश्चेतना धृतिः |
एतत्क्षेत्रं समासेन
सविकारमुदाहृतम् ||

13.8 अमानित्वमदंभित्वम्
अहिंसा क्षान्तिरार्जवम् |
आचार्योपासनं शौचं
स्थैर्यमात्मविनिग्रहः ||

13.9 इन्द्रियार्थेषु वैराग्यम्
अनहङ्कार एव च |
जन्ममृत्युजराव्याधि
दुःखदोषानुदर्शनम् ||

13.10 असक्तिरनभिष्वङ्गः
पुत्रदारगृहादिषु |
नित्यं च समचित्तत्वम्
इष्टानिष्टोपपत्तिषु ||

13.11 मयि चानन्ययोगेन
भक्तिरव्यभिचारिणी |
विविक्तदेशसेवित्वम्
अरतिर्जनसंसदि ||

13.12 अध्यात्मज्ञाननित्यत्वं
तत्त्वज्ञानार्थदर्शनम् |
एतज्ज्ञानमिति प्रोक्तम्
अज्ञानं यदतोऽन्यथा ||

**13.13** ज्ञेयं यत्तत्प्रवक्ष्यामि
यज्ज्ञात्वाऽमृतमश्नुते |
अनादिमत्परं ब्रह्म
न सत्तन्नासदुच्यते ||

**13.14** सर्वतः पाणिपादं तत्
सर्वतोऽक्षिशिरोमुखम् |
सर्वतः श्रुतिमल्लोके
सर्वमावृत्य तिष्ठति ||

**13.15** सर्वेन्द्रियगुणाभासं
सर्वेन्द्रियविवर्जितम् |
असक्तं सर्वभृच्चैव
निर्गुणं गुणभोक्तृ च ||

**13.16** बहिरन्तश्च भूतानाम्
अचरं चरमेव च |
सूक्ष्मत्वात्तदविज्ञेयं
दूरस्थं चान्तिके च तत् ||

**13.17** अविभक्तं च भूतेषु
विभक्तमिव च स्थितम् |
भूतभर्तृ च तज्ज्ञेयं
ग्रसिष्णु प्रभविष्णु च ||

**13.18** ज्योतिषामपि तज्ज्योतिः
तमसः परमुच्यते |
ज्ञानं ज्ञेयं ज्ञानगम्यं
हृदि सर्वस्य विष्ठितम् ||

**13.19** इति क्षेत्रं तथा ज्ञानं
ज्ञेयं चोक्तं समासतः |
मद्भक्त एतद्विज्ञाय
मद्भावायोपपद्यते ||

**13.20** प्रकृतिं पुरुषं चैव
विद्ध्यनादी उभावपि |
विकारांश्च गुणांश्चैव
विद्धि प्रकृतिसम्भवान् ||

**13.21** कार्यकरणकर्तृत्वे
हेतुः प्रकृतिरुच्यते |
पुरुषः सुखदुःखानां
भोक्तृत्वे हेतुरुच्यते ||

**13.22** पुरुषः प्रकृतिस्थो हि
भुङ्क्ते प्रकृतिजान्गुणान् |
कारणं गुणसङ्गोऽस्य
सदसद्योनिजन्मसु ||

**13.23** उपद्रष्टाऽनुमन्ता च
भर्ता भोक्ता महेश्वरः |
परमात्मेति चाप्युक्तः
देहेऽस्मिन्पुरुषः परः ||

**13.24** य एवं वेत्ति पुरुषं
प्रकृतिं च गुणैः सह |
सर्वथा वर्तमानोऽपि
न स भूयोऽभिजायते ||

**13.25** ध्यानेनात्मनि पश्यन्ति
केचिदात्मानमात्मना |
अन्ये साङ्ख्येन योगेन
कर्मयोगेन चापरे ||

**13.26** अन्ये त्वेवमजानन्तः
श्रुत्वाऽन्येभ्य उपासते |
तेऽपि चातितरन्त्येव
मृत्युं श्रुतिपरायणाः ||

**13.27** यावत्सञ्जायते किञ्चित्
सत्त्वं स्थावरजङ्गमम् |
क्षेत्रक्षेत्रज्ञसंयोगात्
तद्विद्धि भरतर्षभ ||

**13.28** समं सर्वेषु भूतेषु
तिष्ठन्तं परमेश्वरम् |
विनश्यत्स्वविनश्यन्तं
यः पश्यति स पश्यति ||

13.29 समं पश्यन्हि सर्वत्र
समवस्थितमीश्वरम् |
न हिनस्त्यात्मनाऽऽत्मानं
ततो याति परां गतिम् ||

13.30 प्रकृत्यैव च कर्माणि
क्रियमाणानि सर्वशः |
यः पश्यति तथाऽऽत्मानम्
अकर्तारं स पश्यति ||

13.31 यदा भूतपृथग्भावम्
एकस्थमनुपश्यति |
तत एव च विस्तारं
ब्रह्म सम्पद्यते तदा ||

13.32 अनादित्वान्निर्गुणत्वात्
परमात्मायमव्ययः |
शरीरस्थोऽपि कौन्तेय
न करोति न लिप्यते ||

13.33 यथा सर्वगतं सौक्ष्म्यात्
आकाशं नोपलिप्यते |
सर्वत्रावस्थितो देहे
तथाऽऽत्मा नोपलिप्यते ||

13.34 यथा प्रकाशयत्येकः
कृत्स्नं लोकमिमं रविः |
क्षेत्रं क्षेत्री तथा कृत्स्नं
प्रकाशयति भारत ||

13.35 क्षेत्रक्षेत्रज्ञयोरेवम्
अन्तरं ज्ञानचक्षुषा |
भूतप्रकृतिमोक्षं च
ये विदुर्यान्ति ते परम् ||

# 14 Guṇatrayavibhāga Yoga

14.0 ओं श्री परमात्मने नमः
अथ चतुर्दशोऽध्यायः
गुणत्रयविभागयोगः

14.1 श्री भगवानुवाच
परं भूयः प्रवक्ष्यामि
ज्ञानानां ज्ञानमुत्तमम् |
यज्ज्ञात्वा मुनयः सर्वे
परां सिद्धिमितो गताः ||

14.2 इदं ज्ञानमुपाश्रित्य
मम साधर्म्यमागताः |
सर्गेऽपि नोपजायन्ते
प्रलये न व्यथन्ति च ||

14.3 मम योनिर्महद्ब्रह्म
तस्मिन्गर्भं दधाम्यहम् |
सम्भवः सर्वभूतानां
ततो भवति भारत ||

14.4 सर्वयोनिषु कौन्तेय
मूर्तयः सम्भवन्ति याः |
तासां ब्रह्म महद्योनिः
अहं बीजप्रदः पिता ||

14.5 सत्त्वं रजस्तम इति
गुणाः प्रकृतिसम्भवाः |
निबध्नन्ति महाबाहो
देहे देहिनमव्ययम् ||

14.6 तत्र सत्त्वं निर्मलत्वात्
प्रकाशकमनामयम् |
सुखसङ्गेन बध्नाति
ज्ञानसङ्गेन चानघ ||

14.7 रजो रागात्मकं विद्धि
तृष्णासङ्गसमुद्भवम् |
तन्निबध्नाति कौन्तेय
कर्मसङ्गेन देहिनम् ||

14.8 तमस्त्वज्ञानजं विद्धि
मोहनं सर्वदेहिनाम् |
प्रमादालस्यनिद्राभिः
तन्निबध्नाति भारत ||

14.9 सत्त्वं सुखे सञ्जयति
रजः कर्मणि भारत |
ज्ञानमावृत्य तु तमः
प्रमादे सञ्जयत्युत ||

14.10 रजस्तमश्चाभिभूय
सत्त्वं भवति भारत |
रजः सत्त्वं तमश्चैव
तमः सत्त्वं रजस्तथा ||

14.11 सर्वद्वारेषु देहेऽस्मिन्
प्रकाश उपजायते |
ज्ञानं यदा तदा विद्यात्
विवृद्धं सत्त्वमित्युत ||

14.12 लोभः प्रवृत्तिरारम्भः
कर्मणामशमः स्पृहा |
रजस्येतानि जायन्ते
विवृद्धे भरतर्षभ ||

14.13 अप्रकाशोऽप्रवृत्तिश्च
प्रमादो मोह एव च |
तमस्येतानि जायन्ते
विवृद्धे कुरुनन्दन ||

14.14 यदा सत्त्वे प्रवृद्धे तु
प्रलयं याति देहभृत् |
तदोत्तमविदां लोकान्
अमलान्प्रतिपद्यते ||

14.15 रजसि प्रलयं गत्वा
कर्मसङ्गिषु जायते |
तथा प्रलीनस्तमसि
मूढयोनिषु जायते ||

14.16 कर्मणः सुकृतस्याहुः
सात्त्विकं निर्मलं फलम् |
रजसस्तु फलं दुःखम्
अज्ञानं तमसः फलम् ||

14.17 सत्त्वात्सञ्जायते ज्ञानं
रजसो लोभ एव च |
प्रमादमोहौ तमसः
भवतोऽज्ञानमेव च ||

14.18 ऊर्ध्वं गच्छन्ति सत्त्वस्थाः
मध्ये तिष्ठन्ति राजसाः |
जघन्यगुणवृत्तिस्थाः
अधो गच्छन्ति तामसाः ||

14.19 नान्यं गुणेभ्यः कर्तारं
यदा द्रष्टाऽनुपश्यति |
गुणेभ्यश्च परं वेत्ति
मद्भावं सोऽधिगच्छति ||

14.20 गुणानेतानतीत्य त्रीन्
देही देहसमुद्भवान् |
जन्ममृत्युजरादुःखैः
विमुक्तोऽमृतमश्नुते ||

14.21 अर्जुन उवाच
कैर्लिङ्गैस्त्रीन्गुणानेतान्
अतीतो भवति प्रभो |
किमाचारः कथं चैतान्
त्रीन्गुणानतिवर्तते ||

14.22 श्री भगवानुवाच
प्रकाशं च प्रवृत्तिं च
मोहमेव च पाण्डव |
न द्वेष्टि सम्प्रवृत्तानि
न निवृत्तानि काङ्क्षति ||

14.23 उदासीनवदासीनः
गुणैर्यो न विचाल्यते |
गुणा वर्तन्त इत्येव
योऽवतिष्ठति नेङ्गते ||

14.24 समदुःखसुखः स्वस्थः
समलोष्टाश्मकाञ्चनः |
तुल्यप्रियाप्रियो धीरः
तुल्यनिन्दात्मसंस्तुतिः ||

14.25 मानापमानयोस्तुल्यः
तुल्यो मित्रारिपक्षयोः |
सर्वारम्भपरित्यागी
गुणातीतः स उच्यते ||

14.26 मां च योऽव्यभिचारेण
भक्तियोगेन सेवते |
स गुणान्समतीत्यैतान्
ब्रह्मभूयाय कल्पते ||

14.27 ब्रह्मणो हि प्रतिष्ठाऽहम्
अमृतस्याव्ययस्य च |
शाश्वतस्य च धर्मस्य
सुखस्यैकान्तिकस्य च ||

# 15 Puruṣottama-Prāpti Yoga

15.0 ओं श्री परमात्मने नमः
अथ पञ्चदशोऽध्यायः
पुरुषोत्तमप्राप्तियोगः

15.1 श्रीभगवान् उवाच
ऊर्ध्वमूलमधः* शाखम्
अश्वत्थं प्राहुरव्ययम् |
छन्दांसि यस्य पर्णानि
यस्तं वेद स वेदवित् ||

15.2 अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः
गुणप्रवृद्धा विषयप्रवालाः |
अधश्च मूलान्यनुसन्ततानि
कर्मानुबन्धीनि मनुष्यलोके ||

15.3 न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा |
अश्वत्थमेनं सुविरूढमूलम्
असङ्गशस्त्रेण दृढेन छित्त्वा ||

15.4 ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः |
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ||

15.5 निर्मानमोहा जितसङ्गदोषाः
अध्यात्मनित्या विनिवृत्तकामाः |
द्वन्द्वैर्विमुक्ताः सुखदुःख सञ्ज्ञैः
गच्छन्त्यमूढाः पदमव्ययं तत् ||

15.6 न तद्भासयते सूर्यः
न शशाङ्को न पावकः |
यद्गत्वा न निवर्तन्ते
तद्धाम परमं मम ||

15.7 ममैवांशो जीवलोके
जीवभूतः सनातनः |
मनः षष्ठानीन्द्रियाणि
प्रकृतिस्थानि कर्षति ||

15.8 शरीरं यदवाप्नोति
यच्चाप्युत्क्रामतीश्वरः |
गृहीत्वैतानि संयाति
वायुर्गन्धानिवाशयात् ||

15.9 श्रोत्रं चक्षुः स्पर्शनं च
रसनं घ्राणमेव च |
अधिष्ठाय मनश्चायं
विषयानुपसेवते ||

15.10 उत्क्रामन्तं स्थितं वाऽपि
भुञ्जानं वा गुणान्वितम् |
विमूढा नानुपश्यन्ति
पश्यन्ति ज्ञानचक्षुषः ||

15.11 यतन्तो योगिनश्चैनं
पश्यन्त्यात्मन्यवस्थितम् |
यतन्तोऽप्यकृतात्मानः
नैनं पश्यन्त्यचेतसः ||

15.12 यदादित्यगतं तेजः
जगद्भासयतेऽखिलम् |
यच्चन्द्रमसि यच्चाग्नौ
तत्तेजो विद्धि मामकम् ||

**15.13** गामाविश्य च भूतानि
धारयाम्यहमोजसा |
पुष्णामि चौषधीः सर्वाः
सोमो भूत्वा रसात्मकः ||

**15.14** अहं वैश्वानरो भूत्वा
प्राणिनां देहमाश्रितः |
प्राणापानसमायुक्तः
पचाम्यन्नं चतुर्विधम् ||

**15.15** सर्वस्य चाहं हृदि सन्निविष्टः
मत्तः स्मृतिर्ज्ञानमपोहनं च |
वेदैश्च सर्वैरहमेव वेद्यः
वेदान्तकृद्वेदविदेव चाहम् ||

**15.16** द्वाविमौ पुरुषौ लोके
क्षरश्चाक्षर एव च |
क्षरः सर्वाणि भूतानि
कूटस्थोऽक्षर उच्यते ||

**15.17** उत्तमः पुरुषस्त्वन्यः
परमात्मेत्युदाहृतः |
यो लोकत्रयमाविश्य
बिभर्त्यव्यय ईश्वरः ||

**15.18** यस्मात्क्षरमतीतोऽहम्
अक्षरादपि चोत्तमः |
अतोऽस्मि लोके वेदे च
प्रथितः पुरुषोत्तमः ||

**15.19** यो मामेवमसम्मूढः
जानाति पुरुषोत्तमम् |
स सर्वविद्भजति मां
सर्वभावेन भारत ||

**15.20** इति गुह्यतमं शास्त्रम्
इदमुक्तं मयाऽनघ |
एतद्बुद्ध्वा बुद्धिमान्स्यात्
कृतकृत्यश्च भारत ||

# 16 Daivāsura Sampad Vibhāga Yoga

16.0 ओं श्री परमात्मने नमः
अथ षोदशोऽध्यायः
दैवासुरसम्पद्विभागयोगः

16.1 श्री भगवानुवाच
अभयं सत्त्वसंशुद्धिः
ज्ञानयोगव्यवस्थितिः |
दानं दमश्च यज्ञश्च
स्वाध्यायस्तप आर्जवम् ||

16.2 अहिंसा सत्यमक्रोधः
त्यागः शान्तिरपैशुनम् |
दया भूतेष्वलोलुप्त्वं
मार्दवं ह्रीरचापलम् ||

16.3 तेजः क्षमा धृतिः शौचम्
अद्रोहो नातिमानिता |
भवन्ति सम्पदं दैवीम्
अभिजातस्य भारत ||

16.4 दम्भो दर्पोऽभिमानश्च
क्रोधः पारुष्यमेव च |
अज्ञानं चाभिजातस्य
पार्थ सम्पदमासुरीम् ||

16.5 दैवी सम्पद्विमोक्षाय
निबन्धायासुरी मता |
मा शुचः सम्पदं दैवीम्
अभिजातोऽसि पाण्डव ||

16.6 द्वौ भूतसर्गौ लोकेऽस्मिन्
दैव आसुर एव च |
दैवो विस्तरशः प्रोक्तः
आसुरं पार्थ मे शृणु ||

16.7 प्रवृत्तिं च निवृत्तिं च
जना न विदुरासुराः |
न शौचं नापि चाचारः
न सत्यं तेषु विद्यते ||

16.8 असत्यमप्रतिष्ठं ते
जगदाहुरनीश्वरम् |
अपरस्परसम्भूतं
किमन्यत्कामहैतुकम् ||

16.9 एतां दृष्टिमवष्टभ्य
नष्टात्मानोऽल्पबुद्धयः |
प्रभवन्त्युग्रकर्माणः
क्षयाय जगतोऽहिताः ||

16.10 काममाश्रित्य दुष्पूरं
दम्भमानमदान्विताः |
मोहाद्गृहीत्वासद्ग्राहान्
प्रवर्तन्तेऽशुचिव्रताः ||

16.11 चिन्तामपरिमेयां च
प्रलयान्तामुपाश्रिताः |
कामोपभोगपरमाः
एतावदिति निश्चिताः ||

16.12 आशापाशशतैर्बद्धाः
कामक्रोधपरायणाः |
ईहन्ते कामभोगार्थम्
अन्यायेनार्थसञ्चयान् ||

**16.13** इदमद्य मया लब्धम्
इमं प्राप्स्ये मनोरथम् |
इदमस्तीदमपि मे
भविष्यति पुनर्धनम् ||

**16.14** असौ मया हतः शत्रुः
हनिष्ये चापरानपि |
ईश्वरोऽहमहं भोगी
सिद्धोऽहं बलवान्सुखी ||

**16.15** आढ्योऽभिजनवानस्मि
कोऽन्योऽस्ति सदृशो मया |
यक्ष्ये दास्यामि मोदिष्ये
इत्यज्ञानविमोहिताः ||

**16.16** अनेकचित्तविभ्रान्ताः
मोहजालसमावृताः |
प्रसक्ताः कामभोगेषु
पतन्ति नरकेऽशुचौ ||

**16.17** आत्मसम्भाविताः स्तब्धाः
धनमानमदान्विताः |
यजन्ते नामयज्ञैस्ते
दम्भेनाविधिपूर्वकम् ||

**16.18** अहङ्कारं बलं दर्पं
कामं क्रोधं च संश्रिताः |
मामात्मपरदेहेषु
प्रद्विषन्तोऽभ्यसूयकाः ||

**16.19** तानहं द्विषतः क्रूरान्
संसारेषु नराधमान् |
क्षिपाम्यजस्रमशुभान्
आसुरीष्वेव योनिषु ||

**16.20** आसुरीं योनिमापन्नाः
मूढा जन्मनि जन्मनि |
मामप्राप्यैव कौन्तेय
ततो यान्त्यधमां गतिम् ||

**16.21** त्रिविधं नरकस्येदं
द्वारं नाशनमात्मनः |
कामः क्रोधस्तथा लोभः
तस्मादेतत्त्रयं त्यजेत् ||

**16.22** एतैर्विमुक्तः कौन्तेय
तमोद्वारैस्त्रिभिर्नरः |
आचरत्यात्मनः श्रेयः
ततो याति परां गतिम् ||

**16.23** यः शास्त्रविधिमुत्सृज्य
वर्तते कामकारतः |
न स सिद्धिमवाप्नोति
न सुखं न परां गतिम् ||

**16.24** तस्माच्छास्त्रं प्रमाणं ते
कार्याकार्यव्यवस्थितौ |
ज्ञात्वा शास्त्रविधानोक्तं
कर्म कर्तुमिहार्हसि ||

# 17 Śraddhātraya-Vibhāga Yoga

17.0 ओं श्री परमात्मने नमः
अथ सप्तदशोऽध्यायः
श्रद्धात्रयविभाग योगः

17.1 अर्जुन उवाच
ये शास्त्रविधिमुत्सृज्य
यजन्ते श्रद्धयान्विताः |
तेषां निष्ठा तु का कृष्ण
सत्त्वमाहो रजस्तमः ||

17.2 श्री भगवानुवाच
त्रिविधा भवति श्रद्धा
देहिनां सा स्वभावजा |
सात्त्विकी राजसी चैव
तामसी चेति तां शृणु ||

17.3 सत्त्वानुरूपा सर्वस्य
श्रद्धा भवति भारत |
श्रद्धामयोऽयं पुरुषः
यो यच्छ्रद्धः स एव सः ||

17.4 यजन्ते सात्त्विका देवान्
यक्षरक्षांसि राजसाः |
प्रेतान् भूतगणांश्चान्ये
यजन्ते तामसा जनाः ||

17.5 अशास्त्रविहितं घोरं
तप्यते ये तपो जनाः |
दम्भाहन्कारसम्युताः
कामरागबलान्विताः ||

17.6 कर्शयन्तः शरीरस्थं
भूतग्राममचेतसः |
मां चैवान्तः शरीरस्थं
तान् विद्ध्यासुरनिश्चयान् ||

17.7 आहारस्त्वपि सर्वस्य
त्रिविधो भवति प्रियः |
यज्ञस्तपस्तथा दानं
तेषां भेदमिमम् शृणु ||

17.8 आयुस्सत्त्वबलारोग्य
सुखप्रीतिविवर्धनाः |
रस्याः स्निग्धाः स्थिरा हृद्याः
आहाराः सात्त्विकप्रियाः ||

17.9 कट्वम्ललवणात्युष्ण
तीक्ष्णरूक्षविदाहिनः |
आहारा राजसस्येष्टाः
दुःखशोकामयप्रदाः ||

17.10 यातयामं गतरसं
पूति पर्युषितं च यत् |
उच्छिष्टमपि चामेध्यं
भोजनं तामसप्रियम् ||

17.11 अफलाकाङ्क्षिभिर्यज्ञः
विधिदृष्टो य इज्यते |
यष्टव्यमेवेति मनः
समाधाय स सात्त्विकः ||

17.12 अभिसन्धाय तु फलं
दम्भार्थमपि चैव यत् |
इज्यते भरतश्रेष्ठ
तं यज्ञं विद्धि राजसम् ||

**17.13** विधिहीनमसृष्टान्नं
मन्त्रहीनमदक्षिणम् |
श्रद्धाविरहितं यज्ञं
तामसं परिचक्षते ||

**17.14** देवद्विजगुरुप्राज्ञ
पूजनं शौचमार्जवम् |
ब्रह्मचर्यमहिंसा च
शारीरं तप उच्यते ||

**17.15** अनुद्वेगकरं वाक्यं
सत्यं प्रियहितं च यत् |
स्वाध्यायाभ्यसनं चैव
वाङ्मयं तप उच्यते ||

**17.16** मनः प्रसादः सौम्यत्वं
मौनमात्मविनिग्रहः |
भावसंशुद्धिरित्येतत्
तपो मानसमुच्यते ||

**17.17** श्रद्धया परया तप्तं
तपस्तत् त्रिविधं नरैः |
अफलाकाङ्क्षिभिर्युक्तैः
सत्त्विकं परिचक्षते ||

**17.18** सत्कारमानपूजार्थं
तपो दम्भेन चैव यत् |
क्रियते तदिह प्रोक्तं
राजसं चलमध्रुवम् ||

**17.19** मूढग्राहेणात्मनो यत्
पीडया क्रियते तपः |
परस्योत्सादनार्थं वा
तत्तामसमुदाहृतम् ||

**17.20** दातव्यमिति यद्दानं
दीयतेऽनुपकारिणे |
देशे काले च पात्रे च
तद्दानं सात्त्विकं स्मृतम् ||

**17.21** यत्तु प्रत्युपकारार्थं
फलमुद्दिश्य वा पुनः |
दीयते च परिक्लिष्टं
तद्दानं राजसं स्मृतम् ||

**17.22** अदेशकाले यद्दानम्
अपात्रेभ्यश्च दीयते |
असत्कृतमवज्ञातं
तत्तामसमुदाहृतम् ||

**17.23** ओं तत्सदिति निर्देशः
ब्रह्मणस्त्रिविधः स्मृतः |
ब्राह्मणास्तेन वेदाश्च
यज्ञाश्च विहिताः पुरा ||

**17.24** तस्मादोमित्युदाहृत्य
यज्ञदानतपःक्रियाः |
प्रवर्तन्ते विधानोक्ताः
सततं ब्रह्मवादिनाम् ||

**17.25** तदित्यनभिसन्धाय
फलं यज्ञतपःक्रियाः |
दानक्रियाश्च विविधाः
क्रियन्ते मोक्षकाङ्क्षिभिः ||

**17.26** सद्भावे साधुभावे च
सदित्येतत्प्रयुज्यते |
प्रशस्ते कर्मणि तथा
सच्छब्दः पार्थ युज्यते ||

**17.27** यज्ञे तपसि दाने च
स्थितिः सदिति चोच्यते |
कर्म चैव तदर्थीयं
सदित्येवाभिधीयते ||

**17.28** अश्रद्धया हुतं दत्तं
तपस्तप्तं कृतं च यत् |
असदित्युच्यते पार्थ
न च तत्प्रेत्य नो इह ||

# 18 Mokṣa-Sannyāsa Yoga

18.0 ओं श्री परमात्मने नमः
अथ अष्टादशोऽध्यायः
मोक्षसन्न्यास योगः

18.1 अर्जुन उवाच
सन्न्यासस्य महाबाहो
तत्त्वमिच्छामि वेदितुम् |
त्यागस्य च हृषिकेश
पृथक्केशिनिषूदन ||

18.2 श्री भगवनुवाच
काम्यानां कर्मणां न्यासं
सन्न्यासं कवयो विदुः |
सर्वकर्मफलत्यागं
प्राहुस्त्यागं विचक्षणाः ||

18.3 त्याज्यं दोषवदित्येके
कर्म प्राहुर्मनीषिणः |
यज्ञदानतपः कर्म
न त्याज्यमिति चापरे ||

18.4 निश्चयं शृणु मे तत्र
त्यागे भरतसत्तम |
त्यागो हि पुरुषव्याघ्र
त्रिविधः सम्प्रकीर्तितः ||

18.5 यज्ञदानतपःकर्म
न त्याज्यं कार्यमेव तत् |
यज्ञो दानं तपश्चैव
पावनानि मनीषिणाम् ||

18.6 एतान्यपि तु कर्माणि
सङ्गं त्यक्त्वा फलानि च |
कर्तव्यानीति मे पार्थ
निश्चितं मतमुत्तमम् ||

18.7 नियतस्य तु सन्न्यासः
कर्मणो नोपपद्यते |
मोहात्तस्य परित्यागः
तामसः परिकीर्तितः ||

18.8 दुःखमित्येव यत्कर्म
कायक्लेशभयात्त्यजेत् |
स कृत्वा राजसं त्यागं
नैव त्यागफलं लभेत् ||

18.9 कार्यमित्येव यत्कर्म
नियतं क्रियतेऽर्जुन |
सङ्गं त्यक्त्वा फलं चैव
स त्यागः सात्त्विको मतः ||

18.10 न द्वेष्ट्यकुशलं कर्म
कुशले नानुषज्जते |
त्यागी सत्त्वसमाविष्टः
मेधावी छिन्नसंशयः ||

18.11 न हि देहभृता शक्यं
त्यक्तुं कर्माण्यशेषतः |
यस्तु कर्मफलत्यागी
स त्यागीत्यभिधीयते ||

18.12 अनिष्टमिष्टं मिश्रं च
त्रिविधं कर्मणः फलम् |
भवत्यत्यागिनां प्रेत्य
न तु सन्न्यासिनां क्वचित् ||

**18.13** पञ्चैतानि महाबाहो
कारणानि निबोध मे |
साङ्ख्ये कृतान्ते प्रोक्तानि
सिद्धये सर्वकर्मणाम् ||

**18.14** अधिष्ठानं तथा कर्ता
करणं च पृथग्विधम् |
विविधाश्च पृथक्चेष्टाः
दैवं चैवात्र पञ्चमम् ||

**18.15** शरीरवाङ्मनोभिर्यत्
कर्म प्रारभते नरः |
न्याय्यं वा विपरीतं वा
पञ्चैते तस्य हेतवः ||

**18.16** तत्रैवं सति कर्तारम्
आत्मानं केवलं तु यः |
पश्यत्यकृतबुद्धित्वात्
न स पश्यति दुर्मतिः ||

**18.17** यस्य नाहङ्कृतो भावः
बुद्धिर्यस्य न लिप्यते |
हत्वाऽपि स इमाल्लोकान्
न हन्ति न निबध्यते ||

**18.18** ज्ञानं ज्ञेयं परिज्ञाता
त्रिविधा कर्मचोदना |
करणं कर्म कर्तेति
त्रिविधः कर्मसङ्ग्रहः ||

**18.19** ज्ञानं कर्म च कर्ता च
त्रिधैव गुणभेदतः |
प्रोच्यते गुणसङ्ख्याने
यथावच्छृणु तान्यपि ||

**18.20** सर्वभूतेषु येनैकं
भावमव्ययमीक्षते |
अविभक्तं विभक्तेषु
तज्ज्ञानं विद्धि सात्त्विकम् ||

**18.21** पृथक्त्वेन तु यज्ज्ञानं
नानाभावान् पृथग्विधान् |
वेत्ति सर्वेषु भूतेषु
तज्ज्ञानं विद्धि राजसम् ||

**18.22** यत्तु कृत्स्नवदेकस्मिन्
कार्ये सक्तमहैतुकम् |
अतत्त्वार्थवदल्पं च
तत्तामसमुदाहृतम् ||

**18.23** नियतं सङ्गरहितम्
अरागद्वेषतः कृतम् |
अफलप्रेप्सुना कर्म
यत्तत्सात्त्विकमुच्यते ||

**18.24** यत्तु कामेप्सुना कर्म
साहङ्कारेण वा पुनः |
क्रियते बहुलायासं
तद्राजसमुदाहृतम् ||

**18.25** अनुबन्धं क्षयं हिंसाम्
अनपेक्ष्य च पौरुषम् |
मोहादारभ्यते कर्म
यत्तत्तामसमुच्यते ||

**18.26** मुक्तसङ्गोऽनहंवादी
धृत्युत्साहसमन्वितः |
सिद्ध्यसिद्ध्योर्निर्विकारः
कर्ता सात्त्विक उच्यते ||

**18.27** रागी कर्मफलप्रेप्सुः
लुब्धो हिंसात्मकोऽशुचिः |
हर्षशोकान्वितः कर्ता
राजसः परिकीर्तितः ||

**18.28** अयुक्तः प्राकृतः स्तब्धः
शठो नैष्कृतिकोऽलसः |
विषादी दीर्घसूत्री च
कर्ता तामस उच्यते ||

**18.29** बुद्धेर्भेदं धृतेश्चैव
गुणतस्त्रिविधं शृणु |
प्रोच्यमानमशेषेण
पृथक्त्वेन धनञ्जय ||

**18.30** प्रवृत्तिं च निवृत्तिं च
कार्याकार्ये भयाभये |
बन्धं मोक्षं च या वेत्ति
बुद्धिः सा पार्थ सात्त्विकी ||

**18.31** यया धर्ममधर्मं च
कार्यं चाकार्यमेव च |
अयथावत्प्रजानाति
बुद्धिः सा पार्थ राजसी ||

**18.32** अधर्मं धर्ममिति या
मन्यते तमसाऽऽवृता |
सर्वार्थान्विपरीतांश्च
बुद्धिः सा पार्थ तामसी ||

**18.33** धृत्या यया धारयते
मनः प्राणेन्द्रियक्रियाः |
योगेनाव्यभिचारिण्या
धृतिः सा पार्थ सात्त्विकी ||

**18.34** यया तु धर्मकामार्थान्
धृत्या धारयतेऽर्जुन |
प्रसङ्गेन फलाकाङ्क्षी
धृतिः सा पार्थ राजसी ||

**18.35** यया स्वप्नं भयं शोकं
विषादं मदमेव च |
न विमुञ्चति दुर्मेधाः
धृतिः सा तामसी मता ||

**18.36** सुखं त्विदानीं त्रिविधं
शृणु मे भरतर्षभ |
अभ्यासाद्रमते यत्र
दुःखान्तं च निगच्छति ||

**18.37** यत्तदग्रे विषमिव
परिणामेऽमृतोपमम् |
तत्सुखं सात्त्विकं प्रोक्तम्
आत्मबुद्धिप्रसादजम् ||

**18.38** विषयेन्द्रियसंयोगात्
यत्तदग्रेऽमृतोपमम् |
परिणामे विषमिव
तत्सुखं राजसं स्मृतम् ||

**18.39** यदग्रे चानुबन्धे च
सुखं मोहनमात्मनः |
निद्रालस्यप्रमादोत्थं
तत्तामसमुदाहृतम् ||

**18.40** न तदस्ति पृथिव्यां वा
दिवि देवेषु वा पुनः |
सत्त्वं प्रकृतिजैर्मुक्तं
यदेभिः स्यात्त्रिभिर्गुणैः ||

**18.41** ब्राह्मणक्षत्रियविशां
शूद्राणां च परन्तप |
कर्माणि प्रविभक्तानि
स्वभावप्रभवैर्गुणैः ||

**18.42** शमो दमस्तपः शौचं
षान्तिरार्जवमेव च |
ज्ञानं विज्ञानमास्तिक्यं
ब्रह्मकर्म स्वभावजम् ||

**18.43** शौर्यं तेजो धृतिर्दाक्ष्यं
युद्धे चाप्यपलायनम् |
दानमीश्वरभावश्च
क्षात्रं कर्म स्वभावजम् ||

**18.44** कृषिगौरक्ष्यवाणिज्यं
वैश्यकर्म स्वभावजम् |
परिचर्यात्मकं कर्म
शूद्रस्यापि स्वभावजम् ||

**18.45** स्वे स्वे कर्मण्यभिरतः
संसिद्धिं लभते नरः |
स्वकर्मनिरतः सिद्धिं
यथा विन्दति तच्छृणु ||

**18.46** यतः प्रवृत्तिर्भूतानां
येन सर्वमिदं ततम् |
स्वकर्मणा तमभ्यर्च्य
सिद्धिं विन्दति मानवः ||

**18.47** श्रेयान्स्वधर्मो विगुणः
परधर्मात्स्वनुष्ठितात् |
स्वभावनियतं कर्म
कुर्वन्नाप्नोति किल्बिषम् ||

**18.48** सहजं कर्म कौन्तेय
सदोषमपि न त्यजेत् |
सर्वारम्भा हि दोषेण
धूमेनाग्निरिवावृताः ||

**18.49** असक्तबुद्धिः सर्वत्र
जितात्मा विगतस्पृहः |
नैष्कर्म्यसिद्धिं परमां
सन्न्यासेनाधिगच्छति ||

**18.50** सिद्धिं प्राप्तो यथा ब्रह्म
तथाऽऽप्नोति निबोध मे |
समासेनैव कौन्तेय
निष्ठा ज्ञानस्य या परा ||

**18.51** बुद्ध्या विशुद्धया युक्तः
धृत्याऽऽत्मानं नियम्य च |
शब्दादीन्विषयांस्त्यक्त्वा
रागद्वेषौ व्युदस्य च ||

**18.52** विविक्तसेवी लघ्वाशी
यतवाक्कायमानसः |
ध्यानयोगपरो नित्यं
वैराग्यं समुपाश्रितः ||

**18.53** अहङ्कारं बलं दर्पं
कामं क्रोधं परिग्रहम् |
विमुच्य निर्ममः शान्तः
ब्रह्मभूयाय कल्पते ||

**18.54** ब्रह्मभूतः प्रसन्नात्मा
न शोचति न काङ्क्षति |
समः सर्वेषु भूतेषु
मद्भक्तिं लभते पराम् ||

**18.55** भक्त्या मामभिजानाति
यावान्यश्चास्मि तत्त्वतः |
ततो मां तत्त्वतो ज्ञात्वा
विशते तदनन्तरम् ||

**18.56** सर्वकर्माण्यपि सदा
कुर्वाणो मद्व्यपाश्रयः |
मत्प्रसादादवाप्नोति
शाश्वतं पदमव्ययम् ||

**18.57** चेतसा सर्वकर्माणि
मयि सन्न्यस्य मत्परः |
बुद्धियोगमुपाश्रित्य
मच्चित्तः सततं भव ||

**18.58** मच्चित्तः सर्वदुर्गाणि
मत्प्रसादात्तरिष्यसि |
अथ चेत्त्वमहङ्कारात्
न श्रोष्यसि विनङ्क्ष्यसि ||

**18.59** यदहङ्कारमाश्रित्य
न योत्स्य इति मन्यसे |
मिथ्यैष व्यवसायस्ते
प्रकृतिस्त्वां नियोक्ष्यति ||

**18.60** स्वभावजेन कौन्तेय
निबद्धः स्वेन कर्मणा |
कर्तुं नेच्छसि यन्मोहात्
करिष्यस्यवशोऽपि तत् ||

**18.61** ईश्वरः सर्वभूतानां
हृद्देशेऽर्जुन तिष्ठति |
भ्रामयन्सर्वभूतानि
यन्त्रारूढानि मायया ||

**18.62** तमेव शरणं गच्छ
सर्वभावेन भारत |
तत्प्रसादात्परां शान्तिं
स्थानं प्राप्स्यसि शाश्वतम् ||

**18.63** इति ते ज्ञानमाख्यातं
गुह्याद्गुह्यतरं मया |
विमृश्यैतदशेषेण
यथेच्छसि तथा कुरु ||

**18.64** सर्वगुह्यतमं भूयः
शृणु मे परमं वचः |
इष्टोऽसि मे दृढमिति
ततो वक्ष्यामि ते हितम् ||

**18.65** मन्मना भव मद्भक्तः
मद्याजी मां नमस्कुरु |
मामेवैष्यसि सत्यं ते
प्रतिजाने प्रियोऽसि मे ||

**18.66** सर्वधर्मान्परित्यज्य
मामेकं शरणं व्रज |
अहं त्वा सर्वपापेभ्यः
मोक्षयिष्यामि मा शुचः ||

**18.67** इदं ते नातपस्काय
नाभक्ताय कदाचन |
न चाशुश्रूषवे वाच्यं
न च मां योऽभ्यसूयति ||

**18.68** य इमं परमं गुह्यं
मद्भक्तेष्वभिधास्यति |
भक्तिं मयि परां कृत्वा
मामेवैष्यत्यसंशयः ||

**18.69** न च तस्मान्मनुष्येषु
कश्चिन्मे प्रियकृत्तमः |
भविता न च मे तस्मात्
अन्यः प्रियतरो भुवि ||

**18.70** अध्येष्यते च य इमं
धर्म्यं संवादमावयोः |
ज्ञानयज्ञेन तेनाहम्
इष्टः स्यामिति मे मतिः ||

**18.71** श्रद्धावाननसूयश्च
शृणुयादपि यो नरः |
सोऽपि मुक्तः शुभाल्लोकान्
प्राप्नुयात्पुण्यकर्मणाम् ||

**18.72** कच्चिदेतच्छ्रुतं पार्थ
त्वयैकाग्रेण चेतसा |
कच्चिदज्ञानसम्मोहः
प्रनष्टस्ते धनञ्जय ||

**18.73** अर्जुन उवाच
नष्टो मोहः स्मृतिर्लब्धा
त्वत्प्रसादान्मयाऽच्युत |
स्थितोऽस्मि गतसन्देहः
करिष्ये वचनं तव ||

**18.74** सञ्जय उवाच
इत्यहं वासुदेवस्य
पार्थस्य च महात्मनः |
संवादमिममश्रौषम्
अद्भुतं रोमहर्षणम् ||

**18.75** व्यासप्रसादाच्छ्रुतवान्
इमं गुह्यतमं परम् |
योगं योगेश्वरात्कृष्णात्
साक्षात्कथयतः स्वयम् ||

**18.76** राजन् संस्मृत्य संस्मृत्य
संवादमिममद्भुतम् |
केशवार्जुनयोः पुण्यं
हृष्यामि च मुहुर्मुहुः ||

**18.77** तच्च संस्मृत्य संस्मृत्य
रूपमत्यद्भुतं हरेः |
विस्मयो मे महान्राजन्
हृष्यामि च पुनः पुनः ||

**18.78** यत्र योगेश्वरः कृष्णः
यत्र पार्थो धनुर्धरः |
तत्र श्रीर्विजयो भूतिः
ध्रुवा नीतिर्मतिर्मम ||

# Closing Ślokas

श्रीमद्भगवद्गीतासु उपनिषत्सु
ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन संवादे
(भक्तियोगोनाम द्वादशोध्यायः)

सर्वधर्मान्परित्यज्य
मामेकं शरणं व्रज |
अहम् त्वा सर्वपापेभ्यः
मोक्षयिष्यामि मा शुचः ||

यतः प्रवृत्तिर्भूतानां
येन सर्वमिदं ततम् |
स्वकर्मणा तमभ्यर्च्य
सिद्धिं विंदति मानवः ||

यत्र योगेश्वरः कृष्णः
यत्र पार्थो धनुर्धरः |
तत्र श्रीर्विजयो भूतिः
ध्रुवा नीतिर्मतिर्मम ||

श्री कृष्णश्शरणं मम
श्री कृष्णश्शरणं मम
श्री कृष्णश्शरणं मम